किं कृत्तिवाससं १४ कैलासकूटप्रतिमं वृषभेवस्थितं शिवं निरीक्षमाणं सततं पितृराजाश्रितां दिशं १५ एवमीदृशकं स्वप्नं द्रक्ष्यसि त्वं विशां
पते मा तत्कृते ह्यनुध्याहि कालो हि दुरतिक्रमः १६ स्वस्ति ते स्तु गमिष्यामि कैलासं पर्वतं प्रति अप्रमत्तः स्थितो दांतः पृथिवीं परिपाल
य १७ वैशंपायन उवाच एवमुक्त्वा स भगवान्कैलासं पर्वतं ययौ कृष्णद्वैपायनो व्यासः सह शिष्यैः श्रुतानुगैः १८ गते पितामहे राजा
चिंताशोकसमन्वितः निश्वसन्मुहुरुष्णं स तमेवार्थं विचिंतयन् १९ कथं तु दैवं शक्येत पौरुषेण प्रबाधितुं अवश्यमेव भविता यदुक्तं पर
मर्षिणा २० ततोब्रवीन्महातेजाः सर्वान्भ्रातॄन्युधिष्ठिरः श्रुतं वै पुरुषव्याघ्रा यन्मां द्वैपायनो ब्रवीत् २१ तदा तद्वचनं श्रुत्वा मरणे
निश्चिता मतिः सर्वक्षत्रस्य निधने यद्यहं हेतुरीप्सितः २२ कालेन निर्मितस्तात को ममार्थोस्ति जीवता एवं ब्रुवंतं राजानं फाल्गुनः प्रत्य
भाषत २३ मा राजन्कश्मलं घोरं प्राविशो बुद्धिनाशनं संप्रधार्य महाराज यत्क्षमं तत्समाचर २४ ततोब्रवीत्सत्यधृतिर्भ्रातॄन्स
र्वान्युधिष्ठिरः द्वैपायनस्य वचनं तत्रैव समचिंतयन् २५ अद्यप्रभृति भद्रं वः प्रतिज्ञां मे निबोधत त्रयोदश समास्तात को ममार्थो
स्ति जीवता २६ न प्रवक्ष्यामि परुषं भ्रातॄनन्यांश्च पार्थिवान् स्थितो निदेशे ज्ञातीनां योक्ष्ये तत्समुदाहरन् २७ एवं मे वर्तमानस्य स्व
सुतेष्वितरेषु च भेदो न भविता लोके भेदमूलो हि विग्रहः २८ विग्रहं दूरतो रक्षन्प्रियाण्येव समाचरे वाच्यतां न गमिष्यामि लोकेषु
मनुजर्षभाः २९ भ्रातुर्ज्येष्ठस्य वचनं पांडवाः संनिशम्य तत् तमेव समवर्तंत धर्मराजहिते रताः ३० संसत्सु समयं कृत्वा धर्म
राड्भ्रातृभिः सह पितॄंस्तर्पय यथान्यायं देवताश्च विशांपते ३१

भवतीति मत्वर्थीयप्रत्ययांतरं वाकस्त्यं एवमंत्रा विहेयं १३ १४ १५ १६ १७ १८ ३० ३१

न१ न्य१ ८५

स०
७५

३३ अध्यायः वसन्दुर्योधनस्तस्यामित्याद्यध्यायद्वयस्य तात्पर्यं पापिष्ठः परकल्याणं दृष्ट्वा मरणमिच्छति छलेन परलक्ष्मीं वा हर्तुमिच्छतीति निर्धारणाइति १ अभिप्र

कृतमंगलकल्याणो भ्रातृभिः परिवारितः गतेषु क्षत्रियेन्द्रेषु सर्वेषु [illegible] भरतर्षभ ३२ युधिष्ठिरः सहामात्यः प्रविवेश [illegible] पुरोत्तमं दुर्योधनो महा
राज शकुनिश्चापि सौबलः सभायां रमणीयायां तत्रैवास्ते नराधिप ३३ इति सभापर्वणि वैशंपायन उवाच वसन्दुर्योधनस्तस्यां सभायां पुरुष
र्षभ शनैर्ददर्श तां सर्वां सभां शकुनिना सह १ तस्यां दिव्यानभिप्रायान्ददर्श कुरुनंदनः न दृष्टपूर्वा ये तेन नगरे नागसाह्वये २ स कदाचित्सभा
मध्ये धार्तराष्ट्रो महीपतिः स्फाटिकं स्थलमासाद्य जलमित्यभिशंकया ३ स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः दुर्मना विमुखश्चै
व परिचक्राम तां सभां ततः स्थले निपतितो दुर्मना व्रीडितो नृपः ४ निश्वसन्विमुखश्चापि परिचक्राम तां सभां ततः स्फाटिकतोयां वै स्फा
टिकांबुजशोभितां ५ वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले जले निपतितं दृष्ट्वा भीमसेनो महाबलः जहास जहसुश्चैव किंकराश्च सु
योधनं ७ वासांसि च शुभान्यस्मै प्रददू राजशासनात् तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः ८ अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्त
दा नामर्षयत्ततस्तेषामवहासममर्षणः ९ आकारं रक्षमाणस्तु न स तान्समुदैक्षत पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलं १० आ
रुरोह ततः सर्वे जहसुश्च पुनर्जनाः द्वारं तु विहिताकारं स्फाटिकं प्रेक्ष्य भूमिपः प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इव स्थितः ११ तादृ
शं चापरं द्वारं स्फाटिकोरुकपाटकं विघट्टयन्कराभ्यां तु निःक्रम्याग्रे पपात ह १२ द्वारं तु विततकारं समापेदे पुनश्च सः तद्वृत्तं चेति मन्वा
नो द्वारस्थानादुपारमत् १३

एभ०
७५

नदेवादीनां क्रीडनस्थानाद्यभिनयप्रदर्शकचित्रादिगतान् आशयविशेषान् नागसाह्वये नागेन हस्तिना समानं नाम हस्तिनापुरे २ घृतमूलमुपयोद्घातय
ति स कदाचिदिति ३ १२ तद्वृत्तं तादृशं १३

विप्रलंभान्वंचनानि १४ १८ अनेकाग्रः विक्षिप्तचित्तः १९ २० कुतोमूलं कुत एतस्य दुःखस्य मूलमुत्पत्तिनिमित्तं कुतोहेतोः मूलं स्वस्थानं प्रतिनिःश्वसनाच्छ्वसिति निश्वा २१

एवंप्रलंभाद्विविधान्प्राप्य तत्र विशांपते पांडवेयाभ्यनुज्ञातस्ततो दुर्योधनो नृपः १४ अपहृष्टेन मनसा राजसूये महाक्रतौ प्रेक्ष्य तामद्भु
तामृद्धिं जगाम गजसाह्वयं १५ पांडवश्रीप्रतप्तस्य ध्यायमानस्य गच्छतः दुर्योधनस्य नृपतेः पापा मतिरजायत १६ पार्थान्सुमन
सो दृष्ट्वा पार्थिवांश्च वशानुगान् कृत्स्नं चापि हितं लोकमाकुमारं कुरूद्वह १७ महिमानं परं चापि पांडवानां महात्मनां दुर्योधनो धा
र्तराष्ट्रो विवर्णः समपद्यत १८ स तु गच्छन्ननेकाग्रः सभामेकोऽन्वचिंतयत् श्रियं च तामनुपमां धर्मराजस्य धीमतः १९ प्रमत्तो
धृतराष्ट्रस्य पुत्रो दुर्योधनस्तदा नाभ्यभाषत्सुबलजं भाषमाणं पुनः पुनः २० अनेकाग्रं तु तं दृष्ट्वा शकुनिः प्रत्यभाषत दुर्योधन कु
तो मूलं निःश्वसन्निव गच्छसि २१ दुर्योधन उवाच दृष्ट्वेमां पृथिवीं कृत्स्नां युधिष्ठिरवशानुगां जितामस्त्रप्रतापेन श्वेताश्वस्य महात्मनः
२२ तं च यज्ञं तथाभूतं दृष्ट्वा पार्थस्य मातुल यथा शक्रस्य देवेषु तथाभूतं महाद्युते २३ अमर्षेण तु संपूर्णो दह्यमानो दिवानिशं
शुचिशुक्रागमे काले शुष्ये तोयमिवाल्पकं २४ पश्य सात्वतमुख्येन शिशुपालो निपातितः न च तत्र पुमानासीत्कश्चित्तस्य पदानु
गः २५ तं ४

श्वेताश्वस्यार्जुनस्य २२ २३ शुचिशुक्रौ ज्येष्ठाषाढौ तयोरागमे ग्रीष्मर्तौ २४ पदानुगः प्रतीकारकर्ता २५

२६ अयुक्तमिति छेदः २७ ३२ सोहं न स्त्री पत्निवशत्वात्सपत्नानामपि श्रियं सहते किंतु पुमानस्मीत्यर्थः तर्हि युद्धेनैव पांडवान्जेतुमिच्छेत्तत्राह नचाप्यस्त्रीत्यत्रुर्नेनादि
वदस्त्रबलहीनः तदपि तं पाद्ये सेत तत्राह न पुमानिति परेषामिव अस्तुकष्टं अस्त्रबलं साधयितुमसमर्थः तर्हि क्लीवोसीतिचेत्तत्राह नापुमानिति नक्लीतिपूर्वमेवोक्तम

दह्यमानो हि राजानः पांडवो स्थेनवह्निना क्षांमवंतोपराधं मे कोहि ततु क्षंतुमर्हति २६ वासुदेवेन तत्कर्म यथायुक्तं महत्कृतं शिशुपालवधो राजन् पांडवानां
तापेन महात्मनां २७ तथाहि रत्नान्यादाय विविधानि नृपा नृपं उपातिष्ठंत कौंतेयं वैश्याइव करप्रदाः २८ श्रियं तथागतां दृष्ट्वा ज्वलंतीमिव पाण्ड
वे अमर्षवशमापन्नो दह्यामि नतथोचितः २९ एवं स निश्चयं कृत्वा ततो वचनमब्रवीत् पुनर्गांधारनृपतिं दह्यमान इवाग्निना ३० वह्निमेव प्र
वेक्ष्यामि भक्षयिष्यामि वा विषं अपो वापि प्रवेक्ष्यामि नहि शक्ष्यामि जीवितुं ३१ को हि नाम पुमांल्लोके मर्षयिष्यति सत्त्ववान् सपत्नानृध्यतो दृष्ट्वा हानि
मात्मन एव च ३२ सोहं न स्त्री न चाप्यस्त्री न पुमान्नापुमानपि योहं तां मर्षयाम्यद्य तादृशीं श्रियमागतां ३३ ईश्वरत्वं पृथिव्याश्च वसुमत्तां च ता
दृशीं यज्ञं च तादृशं दृष्ट्वा मादृशः को न संज्वरेत् ३४ अशक्तश्चैक एवाहं तामाहर्तुं नृपश्रियं सहायांश्च न पश्यामि तेन मृत्युं विचिंतये ३५ दैवमेव
परं मन्ये पौरुषं च निरर्थकं दृष्ट्वा कुंतीसुते शुभ्रां श्रियं तामाहृतां तथा ३६ कृतो यत्नो मया पूर्वं विनाशे तस्य सौबल तच्च सर्वमतिक्रम्य संवृद्धो
प्स्विव पंकजं ३७ तेन दैवं परं मन्ये पौरुषं च निरर्थकं धार्तराष्ट्राश्च हीयंते पार्था वर्द्धंति नित्यशः ३८ सोहं श्रियं च तां दृष्ट्वा सभां तां च तथावि
धां रक्षिभिश्चावहासं तं परितप्ये यथाग्निना ३९ स मामभ्यनुजानीहि मातुलाद्य सुदुःखितं अमर्षं च समाविष्टं धृतराष्ट्रे निवेदय ४०
इति सभापर्वणि दुर्योधनसंताप

तः अपुमानिसनेन क्लीव एव ग्राह्यः नापि स्त्रीत्वं तं न तमर्थोस्मीत्यर्थः योहं शत्रुश्रियं सहिष्ये तस्मात्तदपहरणोक्तिः स्त्रीत्वं परोपाधिनिषणीयइतिभावः ३३ ३४
मृत्युं विचिंतये इति शकुनेः सामर्थ्यं ज्ञानता तस्य स्वेशार्थसाधने त्वद्योगं जनयितुमुक्तं ३५ ३९ अनुजानीहि मन्तुमितिशेषः ४० अध्यायः

१६ नुषस्वपीसमेवस १७ अप्रमादेनप्रमादकृतन्स्त्रादिनाशयतिरेकेण १८ १८ १८ १८ १८ १८ १८ १८

शकुनिरुवाच दुर्योधननतेमर्षः कार्यः प्रतियुधिष्ठिरं भागधेयानिहिस्वानिपांडवाभुंजतेसदा १ विधानंविविधाकारंपरंतेषांविधानतः अ
नेकैरभ्युपायैश्चत्वयानशकिताः पुरा २ आरब्धापिमहाराजपुनः पुनररिंदम किमुक्ताश्चनरव्याघ्राभागधेयपुरस्कृताः ३ तैर्लब्धाद्रौपदी
भार्याद्रुपदश्चसुतैः सह सहायः पृथिवीलाभेवासुदेवश्चवीर्यवान् ४ लब्धश्चानाभिभूतार्थैः पित्र्योंऽशः पृथिवीपते विवृद्धस्तेजसातेषांत
त्रकापरिदेवना ५ धनंजयेनगांडीवमक्षय्यौचमहेषुधी लब्धान्यस्त्राणिदिव्यानितर्पयित्वाहुताशनं ६ तेनकार्मुकमुख्येनबाहुवीर्येण
चात्मनः कृतावशेमहीपालास्तत्रकापरिदेवना ७ अग्निदाहान्मयंचापिमोक्षयित्वासदानवं सभांतांकारयामाससव्यसाचीपरंतपः
८ तेनचैवमयेनोक्ताः किंकरानामराक्षसाः वहंतितांसभांभीमास्तत्रकापरिदेवना ९ यच्चासहायतांराजन्नुक्तवानसिभारत तन्मिथ्या
भ्रातरोहीमेतवसर्वेवशानुगाः १० द्रोणस्तवमहेष्वासः सहपुत्रेणवीर्यवान् सूतपुत्रश्चराधेयोगौतमश्चमहारथः ११ अहंचसहसो
दर्यैः सौमदत्तिश्चपार्थिवः एतैस्त्वंसहितः सर्वैर्जयकृत्स्नांवसुंधरां १२ दुर्योधनउवाच त्वयाचसहितेराजन्नेतैश्चान्यैर्महारथैः ए
तानेवविजेष्यामियदित्वमनुमन्यसे १३ एतेषुविजितेष्वद्यभविष्यतिमहीमम सर्वेचपृथिवीपालाः सभासाचमहाधना १४ शकुनि
रुवाच धनंजयोवासुदेवोभीमसेनोयुधिष्ठिरः नकुलः सहदेवश्चद्रुपदश्चसहात्मजैः १५ नैतेयुधिपराजेतुंशक्यादेवगणैरपि महा
रथामहेष्वासाः कृतास्त्रायुद्धदुर्मदाः १६ अहंतुतद्विजानामिविजेतुंयेनशक्यते युधिष्ठिरंस्वयंराजंस्तन्निबोधजुषस्वच १७ दुर्यो
धनउवाच अप्रमादेनसुहृदामन्येषांचमहात्मनां यदिशक्याविजेतुंतेतन्ममाचक्ष्वमातुल १८ १८ १८

१९ देवने द्यूते २० दीप्तां वृद्धिमतीं २१ २४ अध्यायः ३ विवर्णः दुर्ववर्णो हीनवर्णः हरिणः पांडुः दीनः क्षीणदर्पः ४ ५ कुतोमूलं किंमूलं कुत इति प्रश्न

स०
६७

शकुनिरुवाच द्यूतप्रियश्च कौंतेयो न स जानाति देवितुं समाहूतश्च राजेंद्रो न शक्ष्यति निवर्तितुं १९ देवने कुशलश्चाहं न मेस्ति सदृशो भुवि
त्रिषु लोकेषु कौरव्य तं त्वं द्यूते समाह्वय २० तस्याक्षकुशलो राजन्नादास्येहमसंशयं राज्यं श्रियं च तां दीप्तां त्वदर्थे पुरुषर्षभ २१ इदं तु स
र्वं त्वं राज्ञे दुर्योधन निवेदय अनुज्ञातस्तु ते पित्रा विजेष्ये तान्न संशयः २४ दुर्योधन उवाच त्वमेव कुरुमुख्याय धृतराष्ट्राय सौबल निवेदय
यथान्यायं नाहं शक्ष्ये निवेदितुं २५ इति सभापर्वणि दुर्योधनसंतापे वैशंपायन उवाच अनुभूय तु राज्ञस्तं राजसूयं महाक्रतुं युधि
ष्ठिरस्य नृपतेर्गांधारीपुत्रसंयुतः १ प्रियकृन्मतमाज्ञाय पूर्वं दुर्योधनस्य तत् प्रज्ञाचक्षुषमासीनं शकुनिः सौबलस्तदा २ दुर्योधनव
चः श्रुत्वा धृतराष्ट्रं जनाधिपं उपगम्य महाप्राज्ञं शकुनिर्वाक्यमब्रवीत् शकुनिरुवाच दुर्योधनो महाराज विवर्णो हरिणः कृशः दीन
श्चिंतापरश्चैव तं विद्धि मनुजाधिप ४ न वै परीक्षसे सम्यगसह्यं शत्रुसंभवं ज्येष्ठपुत्रस्य हृच्छोकं किमर्थं नावबुध्यसे ५ धृतराष्ट्र
उवाच दुर्योधन कुतो मूलं भृशमार्तोसि पुत्रक श्रोतव्यश्चेन्मया सोर्थो ब्रूहि मे कुरुनंदन ६ अयं त्वां शकुनिः प्राह विवर्णं हरिणं
कृशं चिंतयंश्च न पश्यामि शोकस्य तव संभवं ७ ऐश्वर्यं हि महत्पुत्र त्वयि सर्वं प्रतिष्ठितं भ्रातरः सुहृदश्चैव नाचरंति तवाप्रियं ८
आच्छादयसि प्रावारानश्नासि पिशितौदनं आजानेया वहंति त्वां केनासि हरिणः कृशः ९ शयनानि महार्हाणि योषितश्च मनो
रमाः गुणवंति च वेश्मानि विहाराश्च यथासुखं १० देवानामिव ते सर्वं वाचि बद्धं न संशयः स दीन इव दुर्धर्ष कस्माच्छोचसि पुत्रक ११

सभा०
६७

मोर्थेतसिः ६ ८ पिशितौदनं मांससमयमन्नं आजानेयाः जात्यश्वाः ९ विहाराः क्रीडास्थानानि १० वाचि बद्धं वाङ्मात्रसाध्यं ११ ११

१२ प्रकृतीप्रजाः क्लेशान्मुमुक्षुर्मोचयितुमिच्छन्नेवपुरुषउच्यते १३ तत्प्रकृतयोनिः क्लेशाएवसंतोषमनआह यतः संतोषोरैश्वर्ये अलंबुद्धिः श्रियंविद्यमानामपि
हंतीतिसंतुष्टस्यप्रजाः क्लेशंप्राप्नुवंतीत्यर्थः अभिमानंगर्वं अनुक्रोशंदया भयंस्वोनच्छिद्रदृष्टिः महत्पदमितिशेषः १४ १५ ऋद्ध्यतः वर्द्धमानान् आत्मानमिति

दुर्योधनउवाच अश्नाम्याच्छादयेचाहंयथाकुपुरुषस्तथा अमर्षंधारयेचोग्रंनिनीषुः कालपर्ययं १२ अमर्षणः स्वाः प्रकृ
तीरभिभूयपरेस्थिताः क्लेशान्मुमुक्षुः परजान्सवैपुरुषउच्यते १३ संतोषोवैश्रियंहंतिह्यभिमानंचभारत अनुक्रोशभयेचोभेये
र्वृतोनाश्नुतेमहत् १४ नमांप्रीणातिमद्भुक्तंश्रियंदृष्ट्वायुधिष्ठिरे अतिज्वलंतींकौंतेयेविवर्णकरणीमम १५ सपत्नानृध्यतोत्मा
नंहीयमानंनिशाम्यच अमृष्यानपिकौंतेयास्थितान्नाज्ञेविलोकयता १६ तस्मादहंविवर्णश्चदीनश्चहरिणः कृशः अष्टाशी
तिसहस्राणिस्नातकागृहमेधिनः त्रिंशद्दासीकएकैकोयान्बिभर्तियुधिष्ठिरः १७ दशान्यानिसहस्राणिनित्यंतत्रान्नमुत्त
मं भुंजतेरुक्मपात्रीभिर्युधिष्ठिरनिवेशने १८ कदलीमृगमोकानिकृष्णश्यामारुणानिच कांबोजः प्राहिणोत्तस्मैपरार्ध्या
नपिकंबलान् गजयोषिद्गवाश्वस्यशतशोथसहस्रशः १९

निश्छिद्रः पूर्वरूपमात्रं निशाम्यविज्ञाय १६ अदृश्यामपिअवहितत्वात्कौंतेयश्रियंमनसाउद्यतांपश्यन्निवविवर्णोस्मीत्यर्थः १७ १८ कदलीमृगाहरिणविशेषा
ः तेषांमोकानिअजिनानि तान्येवकृष्णश्यामारुणानिविचित्रवर्णानीत्यर्थः १९ १९ १९ १९

म० ७८

वाद्यः क्षेत्रादिहृत्प्रयः तासां धानानामभिनवानां रेदोयेषां तेश्तिव्यधिकरणो बहुव्रीहिः सस्यादिसंपन्नक्षेत्रादिहृत्तिमंतरस्यर्थः वीरोदरैस्तोयमार्गैश्चेति धानानामस्यर्थेषवप्रोक्ताधन्या
केभिनवाङ्किरीतिविश्वः त्रिखर्वैः खर्वत्रयसंख्ये २४ कमंडलूनिति द्वैर्द्रियवा स्यन्दस्मिन्नोकेयद्धीतिरंवेश्च इक्षुचप्राद्यणोदधिमधुघृतं व्यापश्चैतमभिषेकरव्यारणि

त्रिंशतंचोष्ट्रवामीनांशतानिविविचरंसुत एजन्यावलिमादायसमेताहिन्नपक्षये २० एषविविधानिरत्नानिपार्थिवाः पृथिवी
पते आहरन्क्रतुमुख्येस्मिन्कुंतीपुत्रायभूरिशः २१ नकचिद्धिमयातारक्रूरदृष्टैर्वानवश्रुतः याद्दग्धनागमोयज्ञेपांडुपुत्र
स्यधीमतः २२ अयंयंतंधनौघंतंहस्त्वाशत्रोरहंनृप शर्म्मनैवाभिगच्छामिचिंतयानोविशांपते २३ व्रास्यरणावारधानाश्च
गोमंताः शतसंघशः त्रिखर्वैर्वलिमादायद्वारितिष्ठंतिवारिताः २४ कमंडलूनुपादायजातरूपमयान्शुभान् एतद्धनंस
मादायप्रवेशंलेभिरेनच २५ यंथैवमधुशक्रायधारयंत्यमरस्त्रियः तदस्मैकांस्यमाहार्षीद्वारुणंकलशोदधिः २६

त्वदिहत्तानितत्रेतरेषामग्रदर्शनात् दद्यकमंडलूनघृतपूर्णानितिदृष्टव्यं २५ यंथेवेति अमरस्त्रीमः तस्यास्त्रियत्र्याधषयः तदिदंमधुयत्रस्मैकांस्यंकांस्यपात्रस्थंकृत्वाऽऽहा राम०
षीत् सर्थास्त्रीमरएव तथावायुरणावरुणप्रेषितंदधिप्रसिद्धं कलशश्वकलशोजलपूर्णस्तात्समुद्रः आहार्षीत् दधिरितिपुंस्त्वंआर्षंलेखकप्रमादोवा अमेतुकलशो ७८
दधिः समुद्रः । मधु अमृतं जलमित्यन्ये । अमरस्त्रियोनघः वारुणावरुणसंबंधीतिव्याचक्षते २६

शैक्यंवस्त्रामयंपात्राधारभूतंशिक्यंकावडीतिप्रसिद्धं तत्रस्थितंपात्रंशैक्यं एतेनसामुद्र्यआपउक्ताः अन्याअपिपुण्याआपोभिषेकार्थमुक्ताः अदेशांतरे वापीकूपनदीकेभ्यो
ह्रदेभ्यः सरसस्तथा चतुर्भ्यश्चसमुद्रेभ्यः पल्वलादिभिसंश्रितः प्रयागादेवयजनाज्जलान्याहृत्यसर्वतः गंगासरस्वतीचैवनर्मदाचदृषद्वती एभ्योजलंसमाहृत्यतेनाभिषि

शैक्यंरुक्मसहस्रस्यबहुरत्नविभूषितं शंखप्रवरमादायवासुदेवोभिषिक्तवान् २७ दृष्ट्वाचममतत्सर्वंज्वररूपमिवाभवत् गृहीत्वातत्तु
गच्छंतिसमुद्रौपूर्वदक्षिणौ २८ तथैवपश्चिमंयांतिगृहीत्वाभरतर्षभ उत्तरंतुनगच्छंतिविनातातपतत्रिणः २९ तत्रगत्वार्जुनोदंड
माजहारामितंधनं इदंचाद्भुतमत्रासीत्तन्मेनिगदतःशृणु ३० पूर्णेशतसहस्रेतुविप्राणांपरिविष्यतां स्थापितातत्रसंज्ञाभूच्छंखो
ध्मायतिनित्यशः ३१ मुहुर्मुहुःप्रणदतस्तस्यशंखस्यभारत अनिशंशुश्रुवेशब्दंततोरोमाणिमेहृषन् ३२ पार्थिवैर्बहुभिःकीर्णमु
पस्थानंदिदृक्षुभिः अशोभतमहाराजनक्षत्रैर्द्यौरिवामला ३३ सर्वरत्नान्युपादायपार्थिवावैजनेश्वर यज्ञेतस्यमहाराजपांडुपुत्रस्य
धीमतः ३४ वैश्याइवमहीपालाद्विजातिपरिवेशकाः नसाश्रीर्देवराजस्ययमस्यवरुणस्यच गुह्यकाधिपतेर्वापियाश्रीराजन्यु
धिष्ठिरे ३५ तांदृष्ट्वापांडुपुत्रस्यश्रियंपरमिकामहं शांतिंनपरिगच्छामिदह्यमानेनचेतसा ३६ ३६

षिचुर्द्विजाइति २७ २८ पतत्रिणः खेचरजातीयाःदेवादयः तैरेवोत्तरसमुद्रजलमानीतमित्यर्थः अन्यथाचतुर्भ्यश्चसमुद्रेभ्यइत्यनुपपन्नंस्यात् २९ ३० परि
वेषयतां परिवेष्यमाणानां संज्ञासंकेतः ३१ ३२ उपतिष्ठंत्यस्मिन्नित्युपस्थानंसभाउपाहृत्यस्थिताइतिशेषः ३३ ३४ ३५ ३५

स० अक्षेषुपाशेष्वभिज्ञातः कुशलः हृदयज्ञः पातयिष्यमाणानामक्षाणांजयपराजयावहत्वाभिज्ञः पणज्ञः तदनुसारेणाक्षप्रयोगवित् विशेषज्ञः दिक्कालाद्या
७९ नुकूल्याभिज्ञः ३८ द्यूतात्द्यूतहेतोः रणात्रणहेतोः ३९ कपटंअक्षाधिष्ठात्र्याःदेवतायावशीकरणं यद्वासर्वतश्चतुष्कोणतयाद्वादशधारेष्वक्षेषुषट्तला
निभवंतियेषुत्रिषुत्रिषुद्वेव्यतिरेकेणनोमनीलिख्यंते तत्रकपटंनाम सुषिरमक्षंकृत्वापरनामांकितमक्षंगर्भेगुरुद्रव्यसंश्लेषंकृत्वापातितस्याक्षस्यस्वनामे

शकुनिरुवाच यामेतामतुलांलक्ष्मींदृष्टवानसिपांडवे तस्याः प्राप्तावुपायंमेशृणुसत्यपराक्रम ३७ अहमक्षेष्वभिज्ञातःपृ
थिव्यामपिभारत हृदयज्ञः पणज्ञश्चविशेषज्ञश्चदेवने ३८ द्यूतप्रियश्चकौंतेयोनचजानातिदेवितुं आहूतश्चैष्यतिव्यक्तं
द्यूतादपिरणादपि ३९ नियतंतंविजेष्यामिकृत्वातुकपटंविभो आनयामिसमृद्धिंतांदिव्यांचोपाह्वयस्वतं ४० वैशंपाय
नउवाच एवमुक्तःशकुनिनाराजादुर्योधनस्ततः धृतराष्ट्रमिदंवाक्यमपदांतरमब्रवीत् ४१ अयमुत्सहतेराजन्श्रिय
माहर्तुमक्षवित् द्यूतेनपांडुपुत्रस्यतदनुज्ञातुमर्हसि ४२ धृतराष्ट्रउवाच क्षत्तामंत्रीमहाप्राज्ञःस्थितोयस्यास्मिशासने
तेनसंगम्यवेत्स्यामिकार्यस्यास्यविनिश्चयं ४३ सहिधर्मंपुरस्कृत्यदीर्घदर्शीपरंहितं उभयोःपक्षयोर्युक्तंवक्ष्यत्यर्थविनिश्चयं
४४ दुर्योधनउवाच निवर्तयिष्यतित्वासौयदिक्षत्तासमेष्यति निवृत्तेत्वयिराजेंद्रमरिष्येहमसंशयं ४५ ॥ ॥ ॥

वोपरिभवति तदातस्यजयः परस्यनामाधस्थंतस्यपराजयइति ४० अपदांतरंअनुपदमेव ४१ ४२ ४४ त्वासौत्वामसौ निवर्त्तयिष्यतित्वासा स०
विमोहः विवरणंतौचैवशशोकतांचेसंतस्यदुर्योधनविलापस्यतात्पर्यंपुण्यवतामीश्वरप्रसादलभ्यामृद्धिंदृष्ट्वापापिनांपरितापोभवतीति ४५ ४५ ४५ ७९

४८ रत्नैस्संस्तीर्यरत्नस्वचितांकृतां तक्ष्णः वर्द्धकिनः सर्वशः सर्वदेशीयान् ४९ ५३ व्यवसायंविनिश्चयं दिष्टंदैवं ५६ ५९ आपगेयंभीष्मं ६० अध्यायः ॥

सत्वंमयिमृतेराजन्विदुरेणसुखीभव भोक्ष्यसेपृथिवींकृत्स्नांकिंमयात्वंकरिष्यसि ४६ वैशंपायनउवाच आर्त्तवाक्यंतुतत्तस्यप्रणयो
क्तंनिशम्यसः धृतराष्ट्रोब्रवीत्प्रेष्यान्दुर्योधनमतेस्थितः ४७ स्थूणासहस्रैर्बृहतीशतद्वारांसभांमम मनोरमांदर्शनीयामाशुकुर्वंतुशि
ल्पिनः ४८ ततः संस्तीर्यरत्नैस्तांतक्ष्णानानाय्यसर्वशः सुकृतांसुप्रवेशांचनिवेदयतमेशनैः ४९ दुर्योधनस्यशांत्यर्थमितिनिश्चि
त्यभूमिपः धृतराष्ट्रोमहाराजप्राहिणोद्विदुरायवै ५० अपृष्ट्वाविदुरंह्यस्य नासीत्कश्चिद्विनिश्चयः द्यूतेदोषांश्चजानन्सपुत्रस्नेहा
दकृष्यत ५१ तच्छ्रुत्वाविदुरोधीमानकलिद्वारमुपस्थितं विनाशमुखमुत्पन्नंधृतराष्ट्रमुपाद्रवत् ५२ सोभिगम्यमहात्मानंभ्रा आताप
तरमग्रजं मूर्ध्नाप्रणम्यचरणाविदंवचनमब्रवीत् ५३ विदुरउवाच नाभिनंदामितेराजन्व्यवसायमिमंप्रभो पुत्रैर्भेदोयथानस्यात्
द्यूतहेतोस्तथाकुरु ५४ धृतराष्ट्रउवाच क्षत्तः पुत्रेषुपुत्रैर्मेकलहोनभविष्यति दिविदेवाः प्रसादन्नः करिष्यंतिनसंशयः
५५ अशुभंवाशुभंवापिहितंवायदिवाहितं प्रवर्ततांसुहृद्द्यूतंदिष्टमेतन्नसंशयः ५६ मयिसन्निहितेद्रोणेभीष्मेत्वयिचभा
रत अनयोदैवविहितोनकथंचिद्भविष्यति ५७ गच्छत्वंरथमास्थायहयैर्वातसमैर्जवे खांडवप्रस्थमद्यैवसमानययुधिष्ठिरं
५८ नवाच्योव्यवसायोमेविदुरैतद्ब्रवीमिते दैवमेवपरंमन्येयेनैतदुपपद्यते ५९ इत्युक्तोविदुरोधीमान्नेदमस्तीतिचिंतयन्
आपगेयंमहाप्राज्ञमभ्यगच्छत्सुदुःखितः ६० इतिसभापर्वणिदुर्योधनसंतापे ॥

कथं व्यसनंस्त्रापन् सभास्ताराः सभासदः ८ १० भेदोवैरं ११ १५ संमूर्छितमितियोविदृद्वं १६ १६ १६ १६

स० २०

जनमेजयउवाच कथंसमभवद्द्यूतंभ्रातॄणांतन्महात्ययं यत्रतद्व्यसनंप्राप्तंपाण्डवैर्मेपितामहैः १ केचतत्रसभास्ताराराजानो
ब्रह्मवित्तम केचैनमन्वमोदंतकेचैनंप्रत्यषेधयन् २ विस्तरेणैतदिच्छामिकथ्यमानंत्वयाद्विज मूलंह्येतद्विनाशस्यपृथिव्याद्विज
सत्तम ३ सौतिरुवाच एवमुक्तस्तदाराज्ञाव्यासशिष्यः प्रतापवान् आचचक्षेथयद्वृत्तंतत्सर्वंवेदतत्त्ववित् ४ वैशंपायन
उवाच शृणुमेविस्तरेणेमांकथांभरतसत्तम भूयएवमहाराजयदितेश्रवणेमतिः ५ विदुरस्यमतिंज्ञात्वाधृतराष्ट्रोम्बिकासुतः दुर्यो
धनमिदंवाक्यमुवाचविजनेपुनः ६ अलंद्यूतेनगांधारेविदुरोनप्रशंसति नह्यसौसुमहाबुद्धिरहितंनोवदिष्यति ७ हितंहिपरंमन्येवि
दुरोयत्प्रभाषते क्रियतांपुत्रतत्सर्वमेतन्मन्येहितंतव ८ देवर्षिर्वासवगुरुर्देवराजायधीमते यत्प्राहशास्त्रंभगवान्बृहस्पतिरुदारधीः त
द्वेदविदुरः सर्वंसरहस्यंमहाकविः ९ स्थितस्तुवचनेतस्यसदाहमपिपुत्रक विदुरोवापिमेधावीकुरूणांप्रवरोमतः १० उद्धवोवा
महाबुद्धिर्वृष्णीनामर्चितोनृप तदलंपुत्रद्यूतेनद्यूतेभेदोहिदृश्यते ११ भेदेविनाशः स्याद्राजन्तत्पुत्रपरिवर्जय पित्रामात्राचपुत्रस्य
यदेष्टंकार्यंपरमंस्मृतं १२ प्राप्तस्त्वमसितन्नामपितृपैतामहंपदं अधीतवान्कृतीशास्त्रेलालितः सततंगृहे १३ भ्रातृज्येष्ठः स्थितो
राज्येविंदसेकिन्नशोभनं पृथग्जनैरलभ्यंयद्भोजनाच्छादनंपरं १४ तत्प्राप्तोसिमहाबाहोकस्माच्छोचसिपुत्रक स्फीतंराष्ट्रंमहाबाहो
पितृपैतामहंमहत् १५ नित्यमाज्ञापयन्भासिदिविदेवेश्वरोयथा तस्यतेविदितप्रज्ञशोकमूलमिदंकथं समुत्थितंदुःखकरंतन्मे
शंसितुमर्हसि १६ ॥ ॥

राम० २०

अमर्षं असहिष्णुतां १६ साधारणी विशेषरहिता १८ स्थिरः स्थावरः पाषाणतुल्योस्मि यतो न विदीर्णो भवामि १९ आवर्जिताः दासवद्दूरागताः २० पर्युदस्ताः दूरक्षि
प्ताः २१ ज्येष्ठो वयसाधिकः श्रेष्ठः प्रशस्यतमः युक्तो नियुक्तः २२ अर्घहारिणां बहुमूल्यवतां रत्नानां अपारा जातिरित्यर्थः सुत्कर्षवस्तूनां पुरस्थितानां प्रान्तो पर्यन्तो

दुर्योधनउवाच अशाम्याध्यास्यामीतिमपश्यन्नायपूरुषः नामर्षं कुरुते यस्तु पुरुषः सोधमः स्मृतः १७ न मां प्रीणाति राजेन्द्र
लक्ष्मीः साधारणी विभो ज्वलितामिव कौन्तेये श्रियं दृष्ट्वा च विव्यथे १८ सर्वां च पृथिवीं चैव युधिष्ठिरवशानुगां स्थिरोस्मि योहं जीवा
मि दुःखादेतद्ब्रवीमि ते १९ आवर्जिता इवाभान्ति निघ्नाश्चैत्रककौकुराः कारस्करा लोहजंघा युधिष्ठिरनिवेशने २० हिमवत्साग
रानूपाः सर्वे रत्नाकरास्तथा अन्त्याः सर्वे पर्युदस्ता युधिष्ठिरनिवेशने २१ ज्येष्ठोयमिति मां मत्वा श्रेष्ठश्चेति विशांपते युधिष्ठिरेण सत्
कृत्य युक्तो रत्नपरिग्रहे २२ उपस्थितानां रत्नानां श्रेष्ठानामर्घहारिणां नादृश्यत परः पारो नापरस्तत्र भारत २३ न मे हस्तः सम
भवद्वसु तत्प्रतिगृह्णतः अतिष्ठन्त मयि श्रान्ते गृह्य दूराहृतं वसु २४ कृतां बिन्दुसरोरत्नैर्मयेन स्फाटिकच्छदां अपश्यं नलिनीं पूर्णा
मुदकस्येव भारत २५ वस्त्रमुत्कर्षति मयि प्राहसत्स वृकोदरः शत्रोरृद्धिविशेषेण विमूढं रत्नवर्जितं २६ तत्र स्म यदि शक्तः स्यां
पातयेयं वृकोदरं यदि कुर्यां समारंभं भीमं हन्तुं नराधिप २७ शिशुपाल इवास्माकं गतिः स्यान्नात्र संशयः सपत्नेनावहासो मे स मां द
हति भारत २८ ॥

देशतः यत्नावधारणं च वसु धनं कर्तुं अशक्यमित्यर्थः २३ समभवत् समर्थो नाभवत् अतिष्ठंत प्रतीक्षां कृतवंतः वसुनः आहर्तारः वसुदातुं २४ स्फाटिकाः छदा द्रुवच्छदाः
उपकंठस्थसोपानादयो यस्यास्तां बिंदुसरसः सकाशात् आहृतैः रत्नैः २५ २६ २८ २८ २८ २८

स०
८१

३१ प्रलंभंवंचनां ३२ ३६ अध्यायः पन्नया १ फलतः संख्यापरिछिन्नतः भूमितः देशभेदतो वानाविदमितिसंबंधः अपितथापिमुख्यतः वक्ष्यमाणंधनंप्रतिप

पुनश्चतादृशीमेववापींजलजशालिनीं मत्वाशिलासमांतोयेपतितोस्मिनराधिप २९ तत्रमांप्राहसत्कृष्णः पार्थेनसहसुस्वरं द्रौप
दीचसहस्त्रीभिर्व्यथयंतीमनोमम ३० क्लिन्नवस्त्रस्यतुजलेकिंकराराजनोदिताः ददुर्वासांसिमेन्यानितच्चदुःखतरंमम ३१ प्र
लंभंचशृणुष्वान्यंगदतोमेनराधिप अद्वारेणविनिर्गच्छन्द्वारसंस्थानरूपिणा अभिहत्यशिलांभूयोललाटेनास्मिविक्षतः ३२
तत्रमांयमजौदूरादालोक्याभिहतंतदा बाहुभिः परिगृह्णीतांशोचंतौसहितावुभौ ३३ उवाचसहदेवस्तुतत्रमांविस्मयन्निव इदं
द्वारमितोगच्छराजन्नितिपुनःपुनः ३४ भीमसेनेनतत्रोक्तोधृतराष्ट्रात्मजेतिच संबोध्यप्रहसित्वाचइतोद्वारंनराधिप ३५
नामधेयानिरत्नानांपुरस्तान्नश्रुतानिमे यानिदृष्टानिमेतस्यांमनस्तपतितच्चमे ३६ इतिसभापर्वणिदुर्योधनसंतापे दुर्यो
धनउवाच यन्मयापांडवेयानांदृष्टंतच्छृणुभारत आहृतंभूमिपालैर्हिवसुमुख्यंततस्ततः १ नाविंदंदृढमात्मानंदृष्ट्वाहं
तदरेर्धनं फलतोभूमितोवापिप्रतिपद्यस्वभारत २ ऐडांश्चैलान्वार्षदंशान्जातरूपपरिष्कृतान् प्रावाराजिनमुख्यांश्चकां
बोजः प्रददौबहून् ३ ३

द्यस्वेत्यर्थः यद्वाफलतोजातंवस्त्रादि भूमितोजातंहीरादि २ ऐडांनमेषरोमजान् चैलान्बिलवासिमूषकादिरोमजान् वार्षदंशान्बिडालरोमजान् जातरूपपरि
ष्कृतान्सुवर्णतंतुभिर्व्यूतान्हिंडुभिर्वाविचित्रितान् आजिनाः प्रावाराः अम्माम्यजिनानीतिवाविभागः ३ ४ ॥ ॥

सभा०
८१

(c) Dharmarth Trust. Digitized By eGangotri

त्रिन्निखिकल्माषानतिन्निरिपक्षिवच्चित्रान् उष्ट्राः वाम्यः गर्दभाश्वसंकरजाः उभयेपि पील्वादिना पुष्टिं गताः ४ गोवासनाः बलीवर्दपोषकाः क्षेत्रादिवृत्तिमन्तो ब्राह्मणाः तथा
दासनीयाः दास्ययोग्याः शूद्रादयः ५ ब्राह्मणा एव वाताः दृशाः यथोक्तं सर्वान्ब्राह्मणान्भक्त्या शुश्रूषमाणो भावे यस्मै नैवं कृतराजन्नगृहीतं विशांपते कामं तं धार्मिको राजा
शूद्रकर्माणि कारयेदिति अस्मिन्पक्षे त्रिखर्वं त्रीणि याजनाध्यापनप्रतिग्रहाः खर्वाणि अनुज्ञानि धनलाभरूपफलहीनानि येषां ते त्रिखर्वाः विद्याध्ययनसत्त्कर्मशून्यत्वात्
प

अश्वांस्तित्तिरिकल्माषांस्त्रिशतं शुकनासिकान् उष्ट्रवामीस्त्रिशतं च पुष्टाः पीलुशमीङ्गुदैः ४ गोवासना ब्राह्मणाश्च दासनीमीयाश्च
सर्वशः प्रीत्यर्थं ते महाराज धर्मराज्ञो महात्मनः ५ त्रिखर्वं बलिमादाय द्वारि तिष्ठन्ति वारिताः ब्राह्मणा वाटधानाश्च गोमन्तः शतसंघशः
६ कमण्डलूनुपादाय जातरूपमयान् शुभान् ७ एवं बलिं समादाय प्रवेशं लेभिरेनच शतं दासीसहस्राणां कार्पासिकनिवासिनां ८
श्यामास्तन्व्यो दीर्घकेश्यो हेमाभरणभूषिताः शूद्रा विप्रोत्तमार्हाणि राङ्कवाण्यजिनानि च ९ बलिं च कृत्स्नमादाय कार्पासिकनिवा
सिनः उपनिन्युर्महाराज हयान्गान्धारदेशजान् १० इन्द्रकृष्टैर्वर्तयन्ति धान्यैर्ये च नदीमुखैः समुद्रनिष्कुटे जाताः परिसिन्धु च मा
नवाः ११ ते वैरामाः पारदाश्च आभीराः कितवैः सह विविधं बलिमादाय रत्नानि विविधानि च १२ अजाविकं गोहिरण्यं खरो
ष्ट्रं फलजं मधु कम्बलान्विविधांश्चैव द्वारि तिष्ठन्ति वारिताः १३

याजनादिहीना इत्यर्थः तैः धर्कटसंज्ञैः प्रदेयो बलिस्त्रिखर्वबलिः तमित्यर्थः वारिता इत्यनेन तेषां असंनहीनतार्थिता ६ कार्पासिको देशविशेषः ७ ८ मरुकच्छः
देशः कांचनमयः सजलप्रदेशोऽपस्मिन्स तथा भरुभिर्नीरिकांचने अथ कच्छः स्यादनूपे इति विश्वः १० समुद्रसमीपस्थनिष्कुटे गृहोद्याने समुद्रनिष्कुटे इन्द्रकृष्टैः इन्द्रे
णैव कृष्टैः न तु कर्षणादिक्लेशैस्त्रियकपत्नापेक्षैः वनधान्यैर्वृक्षभावेन तु नदीमुखैः नदीप्रभवैः ११ १२ फलजं मधु वृक्षादिजातीयं १३ ॥

१५ अश्मसारो हीरपद्मरागादिमणयः तन्मयं भांडं भूषणं भांडं भूषणमोचयीतिविश्वः त्सरुः खङ्गमुष्टिः १६ अक्षाद्यो देशप्राच्यभेदाः १७ नानावर्णाननुरासभान्प्रमाणेन

स० ८२

प्राग्ज्योतिषाधिपः शूरो म्लेच्छानामधिपो बली यवनैः सहितो राजा भगदत्तो महारथः १४ आजानेयान्हयाञ्छीघ्रानादायानिलरंहस
: बलिं च कृत्स्नमादाय द्वारि तिष्ठति वारितः १५ अश्मसारमयं भांडं शुद्धदन्तत्सरूनसीन् प्राग्ज्योतिषाधिपो दत्त्वा भगदत्तोऽव्रजत्तदा
१६ द्व्यक्षांस्त्र्यक्षाँल्ललाटाक्षान्नानादिग्भ्यः समागतान् औष्णीकानन्तवासांश्च रोमकान्पुरुषादकान् १७ एकपादांश्च तत्राहमप
श्यं द्वारि वारितान् राजानो बलिमादाय नानावर्णाननेकशः १८ कृष्णग्रीवान्महाकायान्रासभान्दूरपातिनः आजह्रुर्दशसाहस्रा
न्विनीतान्दिक्षु विश्रुतान् १९ प्रमाणरागसंपन्नान्वंक्षुतीरसमुद्भवान् बल्यर्थं ददतस्तस्मै हिरण्यं रजतं बहु २० दत्त्वा प्रवेशं प्राप्ता
स्ते युधिष्ठिरनिवेशने इंद्रगोपकवर्णाभाञ्छुकवर्णान्मनोजवान् २१ तथैवेंद्रायुधनिभान्संध्याभ्रसदृशानपि अनेकवर्णानारण्या
न्गृहीत्वाश्वान्महाजवान् २२ जातरूपमनर्घ्यं च ददुस्तस्यैकपादकाः चीनाञ्छकांस्तथा ओड्रान्बर्वरान्वनवासिनः २३
वार्ष्णेयान्हारहूणांश्च कृष्णान्हैमवतांस्तथा नीपानूपानधिगतान्विविधान्द्वारवारितान् २४ बल्यर्थं ददतस्तस्य नानारूपाननेक
कशः कृष्णग्रीवान्महाकायान्रासभाञ्छतपातिनः आहार्षुर्दशसाहस्रान्विनीतान्दिक्षु विश्रुतान् १५ प्रमाणरागस्पर्शाढ्यं
वाह्लीचीनसमुद्भवं और्णं च रांकवं चैव कीटजं पट्टजं तथा २६ कुटीकृतं तथैवात्र कमलाभं सहस्रशः श्लक्ष्णं वस्त्रमकार्पासमा
विकं मृदु चाजिनं २७ निशितांश्चैव दीर्घासीनृष्टिशक्तिपरश्वधान् अपरान्तसमुद्भूतांस्तथैव परशून्शितान् २८ ॥

सभापर्व ५८

स० ८२

दैर्घ्यपुष्ट्यादिना रागेणारम्यवर्णेन च संपन्नान् आधिकान् २० २६ कुटीकृतं चित्रगुच्छाकारं कृतं स्यात् कुटीकं महार्सं चमुरायां चित्रगुच्छकेऽ इति विश्वः २७ अपरा

रसान्संवंतितर्बुजादीनि गंधानगंधवंतिमगदादीनि २९ ३३ वैयाघ्रंपरिवारितान्व्याघ्रचर्मणापरिवृतान् परिस्तोमानंजकंवलान्परिस्तोमःकुथोद्व

रसान्गंधांश्चविविधान्रत्नानिचसहस्रशः बलिंचकृत्स्नमादायद्वारितिष्ठंतिवारिताः २९ शकास्तुषाराःकंकाश्च
रोमशाःशृंगिणोनराः महागजान्दूरगमान्गणितानर्बुदान्हयान् ३० शतशश्चैवबहुशःसुवर्णंपद्मसंमितं ब
लिमादायविविधंद्वारितिष्ठंतिवारिताः ३१ आसनानिमहार्हाणियानानिशयनानिच मणिकांचनचित्राणिगजदं
तमयानिच ३२ कवचानिविचित्राणिशस्त्राणिविविधानिच रथांश्चविविधाकारान्जातरूपपरिष्कृतान् ३३
हयैर्विनीतैःसंपन्नान्वैयाघ्रपरिवारितान् विचित्रांश्चपरिस्तोमान्रत्नानिविविधानिच ३४ नाराचानर्द्धनाराचान्शस्त्रा
णिविविधानिच एतद्दत्वामहद्द्रव्यंपूर्वदेशाधिपानृपाः प्रविष्टायज्ञसदनंपांडवस्यमहात्मनः ३५ इतिसभापर्वणि
दुर्योधनसंतापे दुर्योधनउवाच दायंतुविविधंतस्मैशृणुमेगदतोनघ यज्ञार्थंराजभिर्दत्तंमहांतंधनसंचयं १
मेरुमंदरयोर्मध्येशैलोदामभितोनदीं येतेकीचकवेणूनांछायांरम्यामुपासते २ खसाएकासनाह्यर्हाःप्रदरादी
र्घवेणवः पारदाश्चकुलिंदाश्चतंगणाःपरतंगणाः ३ तद्वैपिपीलिकंनाममुद्धृतंयत्पिपीलिकैः जातरूपंद्रोणा
मेयमहार्षुःपुंजशोनृपाः ४ कृष्णान्ललामांश्चमरान्शुक्लांश्चान्यान्शशिप्रभान् हिमवत्पुष्पजंचैवस्वादुक्षौद्रंत
थाबहु ५

योरित्यमरः ३४ ३५ अध्यायः दायंकार्थदेयंधनं दायोदानेयौतकादिधनेइतिविश्वः १ ४ कृष्णानित्यादयोमणिभेदाः पाठांतरेहि
मजंहिमालयजं ५

लोहित्यंपर्वतं ८ ९ काकीयकस्यकृस्मागरोः १० ११ निचितंराशीकृतंपर्वतेभ्योविधूरि वर्चसंतेजस्वि अर्शआघव १२ १८ कृतकालाःकृ

स० ८३ उत्तरेभ्यःकुरुभ्यश्चाप्यपोढंमाल्यमंबुभिः उत्तरादपिकैलासादोषधीःसुमहाबलाः ६ पार्वतीयावलिंचान्यमाहृत्य
प्रणताःस्थिताः अजातशत्रोर्नृपतेर्द्वारितिष्ठंतिवारिताः येपरार्द्धेहिमवतःसूर्योदयगिरौनृपाः कारूषेचसमुद्रां
तेलौहित्यमभितश्चये ८ फलमूलाशनायेचकिरताश्चर्मवाससः क्रूरशस्त्राःक्रूरकृतस्तांश्चपश्याम्यहंप्रभो ९
चंदनागुरुकाष्ठानांभारान्कालीयकस्यच चर्मरत्नसुवर्णानांगंधानांचैवराशयः १० कैरातकानामयुतंदा
सीनांचविशांपते आहृत्यरमणीयार्थान्दूरजान्मृगपक्षिणः ११ निचितंपर्वपर्वतेभ्यश्चहिरण्यंभूरिवर्चसं
वलिंचकृत्स्नमादायद्वारितिष्ठंतिवारिताः १२ कैराताद्दरदादर्वाःशूरावैयमकास्तथा औदुंवरादुर्विभागाःपारदा
वाह्लिकैःसह १३ काश्मीराश्चकुमाराश्चघोरकाहंसकायनाः शिवित्रिगर्त्तयौधेयाराजन्यामद्रकेकयाः १४ अं
वष्ठाःकौकुरास्तार्क्ष्यावस्त्रपाःपह्लवैःसह वशातयश्चमौलेयाःसहक्षुद्रकमालवैः १५ पौंड्रिकाःकुक्कुराश्चैवशकाश्चै
वविशांपते अंगावंगाश्चपुंड्राश्चशाणवत्यागयास्तथा १६ सुजातयःश्रेणिमंतःश्रेयांसःशस्त्रधारिणः आहा
र्षुःक्षत्रियावित्तंशतशोजातशत्रवे १७ वंगाःकलिंगामगधास्ताम्रलिप्ताःसपुंड्रकाः दौवालिकाःसागरकाःपत्तोर्णाः
शैशवास्तथा १८ कर्णप्रावरणाश्चैवबहवस्तत्रभारत तत्रस्थाद्वारपालैस्तेप्रोच्यंतेराजशासनात् कृतकालाः स० ८३
सुवलयस्ततोद्वारमवाप्स्यथ १९

तमस्तावाः कृतद्वाराइतिपाठेद्वारंप्रतीहारेणासख्यं १९ श्रीकृष्णायनमः ॥ ॥ ७ ॥ छ ॥ ७ ॥ ७ ॥

ईषादंतान् जांगलरंडकुल्यंदंतान् हेमकक्षाः सुवर्णावरत्राः २० २४ मृक्ताः देशभेदास्तेषां २५ २८ यज्ञसेनेन दत्तानीति शेषः २९

प्रा१

ईषादंतान्हेमकक्षान्पद्मवर्णान्कुथावृतान् शैलाभान्नित्यमत्तांश्चाप्यभितं काम्यकं सरः २० दत्त्वैकैकोदशशतान्कुंजरान्कवचावृतान् क्षमावतः कुलीनांश्च द्वारेणप्रविशंस्तथा २१ एतेचान्येचबहवोगणादिग्भ्यः समागताः अन्यैश्चोपाहृतान्यत्ररत्नानीहमहात्मभिः २२ राजाचित्ररथोनामगांधर्वोवासवानुगः शतानिचत्वारिददौहयानांवातरंहसां २३ तुंबुरुस्तुप्रमुदितोगंधर्वोवाजिनांशतं आम्रपत्रसवर्णानामददद्धेममालिनां २४ कृतीराजाचकौरव्यशूकराणांविशांपते अददद्गजरत्नानांशतानिसुबहून्यथ २५ विराटेनतुमत्स्येनबल्यर्थंहेममालिनां कुंजराणांसहस्रेद्वेमत्तानांसमुपाहृते २६ पांशुराष्ट्राद्वसुदानोराजाषड्विंशतिंगजान् अश्वानांचसहस्रेद्वेराजन्कांचनमालिनां २७ जवसत्वोपपन्नानांवयस्थानांनराधिप बलिंचकृत्स्नमादायपांडवेभ्योन्यवेदयत् २८ यज्ञसेनेनदासीनांसहस्राणिचतुर्दश दासानामयुतंचैवसदाराणांविशांपते २९ अददद्गजरत्नानांशतानिसुबहूनिच गजयुक्तामहाराजरथाःषड्विंशतिस्तथा ३० राज्यंचकृत्स्नंपार्थेभ्योयज्ञार्थंवैनिवेदितं वासुदेवोपिवार्ष्णेयोमानंकुर्वन्किरीटिनः ३१ अददद्गजमुख्यानांसहस्राणिचतुर्दश आत्माहिकृष्णः पार्थस्यकृष्णस्यात्माधनंजयः ३२ यद्ब्रूयादर्जुनः कृष्णंसर्वंकुर्यादसंशयं कृष्णोधनंजयस्यार्थेस्वर्गलोकमपित्यजेत् ३३ तथैवसर्वंकृष्णार्थेप्राणानपिपरित्यजेत् सुरभींश्चंदनरसान्हेमकुंभसमास्थितान् ३४ मलयाद्दर्दुराच्चैवचंदनागुरुसंचयान् मणिरत्नानिभास्वंतिकांचनंसूक्ष्मवस्त्रकं ३५

स पुरुसारंमुक्ताफलादि ३६ कुथान करिकंबलान ३७ ४० १ पर्यस्तइवभदेशोपिलंगीभ तद्रूव उपग्राहान उपहारान ४१ ४३ प्र

[illegible]॰स॰ ८५

चोलपांड्यावपिद्वारं नलेभाते ह्युपस्थितौ समुद्रसारं वैडूर्यं मुक्तासंघांस्तथैवच ३६ शतशश्च कुथांस्तत्र सिं
हलाः समुपाहरन संवृतामणिचीरैस्तु श्यामास्ताम्रांतलोचनाः ३७ तागृहीत्वानरास्तत्र द्वारितिष्ठंति वारिताः
प्रीत्यर्थं ब्राह्मणाश्चैव क्षत्रियाश्च विनिर्जिताः ३८ उपाजह्रुर्विशश्चैव शूद्राः शुश्रूषवस्तथा प्रीत्याच बहुमानाच्चाप्युपा
गच्छन्युधिष्ठिरं ३९ सर्वेम्लेच्छाः सर्ववर्णाः आदिमध्यांतजास्तथा नानादेशसमुत्थैश्च नानाजातिभिरेवच ४० प
र्यस्तइव लोकोयं युधिष्ठिरनिवेशने उच्चावचानुपग्राहान राजभिः प्रापितान्बहून ४१ शत्रूणांपश्यतो विप्रान्मुमू
र्षामेध्यजायत भृत्यास्तुयेपांडवानां तांस्तेवक्ष्यामिपार्थिव ४२ येषामामंचपक्वंच संविधत्ते युधिष्ठिरः अयुतंत्री
णिपद्मानि गजारोहाः ससादिनः ४३ रथानामर्बुदंचापि पादाताबहवस्तथा प्रमीयमाणमामंच पच्यमानं तथैवच
४४ विसृज्यमानंचान्यत्र पुण्याहस्वनएवच नाभुक्तवंतं नापीनं नालंकृतमसत्कृतं ४५ अपश्यंसर्ववर्णानां युधिष्ठि
रनिवेशने अष्टाशीतिसहस्राणि [illegible] स्नातकागृहमेधिनः ४६ त्रिंशद्दासीकएकैकोयान्बिभर्ति युधिष्ठिरः
सुप्रीताः परितुष्टाश्च ते ह्याशंसंत्यरिक्षयं ४७ दशान्यानि सहस्राणि यतीनामूर्ध्वरेतसां भुंजते रुक्मपात्रीभिर्यु
धिष्ठिरनिवेशने ४८ अभुक्तंभुक्तवद्वापि सर्वमाकुब्जवामनं अभुंजानायाज्ञसेनी प्रत्यवैक्षद्विशांपते ४९ द्वौ
करौनप्रयच्छेतां कुंतीपुत्रायभारत सांबंधिकेनपांचालाः सख्येनांधकवृष्णयः ५० इतिसभापर्वणिदुर्योधनसं
तापे
मीयमाणां स्वार्यादिना मानेन गण्यमानं आमं अपक्वं ४४ ४५ ४६ ४७ ४८ ४९ ५० अध्यायः ॥

स॰प॰ ८५

आर्यैस्तु १ ह्रीनिषेवाः लज्जावंतः ह्रीनिषेधा इति पाठे ह्रीरेवाकार्यान्निषेधिका येषां ते २ ५ अनुकर्षः रथाधःस्थितदारु अक्ष्णान् शकयान हेमनक्षान
धनपूर्णान् अक्षः कर्षे तुषे च केशकरव्यवहारयोरिति विश्वः ६ ८ उपासंगं निषंगं सुत्सरुं त्सरुर्मुष्टिः असिखड्गः शैक्यं शिक्या धनं पात्रं ९ १४ वाहुगा

दुर्योधनउवाच आर्यास्तु ये वै राजानः सत्यसंधा महाव्रताः पर्याप्तविद्या वक्तारो वेदान्तावभृथाप्लुताः १ धृतिमंतो ह्रीनिषेधा
धर्मात्मानो यशस्विनः मूर्धाभिषिक्तास्ते चैनं राजानः पर्युपासते २ दक्षिणार्थं समानीता राजभिः कांस्यदोहनाः आरण्या बहु
साहस्रा अपश्यंस्तत्र तत्र गाः ३ आजह्रुस्तत्र सत्कृत्य स्वयमुद्यम्य भारत अभिषेकार्थमव्यग्रा भांडमुच्चावचं नृपाः ४ वाह्लीको
रथमाहार्षीज्जांबूनदविभूषितं सुदक्षिणस्तमयुजे श्वेतैः कांबोजजैर्हयैः सुनीथः प्रीतिमांश्चैव ह्यनुकर्षं महाबलः ध्वजं चेदि
पतिश्चैवमाहार्षीत्स्वयमुद्यतं ६ दाक्षिणात्यः सन्नहनं स्रग्गुष्णीषे च मागधः वसुदानो महेष्वासो गजेन्द्रं षष्टिहायनं ७ मत्स्यस्त्वक्षा
नवावबद्धानेकलव्य उपानहौ आवंत्यस्त्वभिषेकार्थमापो बहुविधास्तथा ८ चेकितान उपासंगं धनुः काश्य उपाहरत् असिं रुक्म
त्सरुं शल्यः शैक्यं कांचनभूषणं ९ अभ्यषिंचत्ततो धौम्यो व्यासश्च सुमहातपाः नारदं च पुरस्कृत्य देवलं चासितं मुनिं १० प्रीति
मंत उपातिष्ठन्नभिषेकं महर्षयः जामदग्न्येन सहितास्तथान्ये वेदपारगाः ११ अभिजग्मुर्महात्मानो मंत्रवद्भूरिदक्षिणं म
हेन्द्रमिव देवेन्द्रं दिवि सप्तर्षयो यथा १२ अधारयच्छत्रमस्य सात्यकिः सत्यविक्रमः धनंजयश्च व्यजने [illegible] भीमसे
नश्च पांडवः १३ चामरे चापि शुद्धे द्वे यमौ जगृहतुस्तथा उपागृह्णाद्यमिंद्राय पुराकल्पे प्रजापतिः १४ तमस्मै शंखमा
हार्षीद्वारुणं कलशोदधिः शैक्यं निष्कसहस्रेण सुकृतं विश्वकर्मणा १५ तेनाभिषिक्तः कृष्णेन तत्र मे कश्मलोऽभवत् १६

शंखं कलशोदधिः समुद्रः निष्कसमुद्रः निष्कसहस्रेण सुवर्णेन सुकृतं अलिम्पं शंखं १५ कश्मलो मूर्छा १६ ॥ छ ॥ छ ॥ छ ॥

१९ मांच विसंज्ञं दृष्ट्वा २० २४ युगं द्वापराख्यं अंधेन विधात्रा नद्धं संवृत्तं अत एव विपर्यस्तं २५ २६ अध्यायः तंवे १ अव्युत्पन्नं परकपटानभिज्ञं

गच्छंति पूर्वादपरं समुद्रं चापि दक्षिणं उत्तरं तु न गच्छंति विना तात पतत्रिभिः १७ तत्रस्म दध्मुः शतशः शंखान्मांगलकारकान प्रणा
स० दंते समाध्मातास्ततो रोमाणि मे हृषन १८ प्रापतन भूमिपालाश्च ये तु हीनास्तु तेजसा धृष्टद्युम्नः पांडवाश्च सात्यकिः केशवोष्टमः
८५ १९ सत्वस्था वीर्य्यसंपन्ना ह्यन्योन्यप्रियदर्शनाः विसंज्ञान भूमिपान दृष्ट्वा मां च ते प्राहसंस्तदा २० ततः प्रहृष्टो बीभत्सुः प्रा
दाद्धेमविषाणिनां शतान्यनडुहां पंच द्विजमुख्येषु भारत २१ नरंति देवो नाभागो यौवनाश्वो मनुर्न च न च राजा पृथुर्वैन्यो
नचाप्यासीद्भगीरथः २२ ययातिर्नहुषो वापि यथा राजा युधिष्ठिरः यथातिमात्रं कौंतेयः श्रिया परमया युतः
२३ राजसूयमवाप्यैवं हरिश्चंद्र इव प्रभुः एतां दृष्ट्वा श्रियं पार्थे हरिश्चंद्रे यथा विभो २४ कथं तु जीवितं श्रेयो मम पश्यसि
भारत अंधेनेव युगं नद्धं विपर्यस्तं नराधिप २५ कनीयांसो विवर्द्धंते ज्येष्ठा हीयंत एव च २५ एवं दृष्ट्वा नाभिविंदामि शर्म्म स
मीक्ष्यमाणोपि कुरुप्रवीर तेनाहमेवं कृशतां गतश्च विवर्णतां चैव सशोकतां च २६ इति सभापर्वणि दुर्योधनसंतापे ५
धृतराष्ट्र उवाच त्वं ज्येष्ठो ज्येष्ठतनयः पुत्र मा पांडवान्द्विष द्वेष्टा ह्यसुखमादत्ते यथैव निधनं तथा १ अव्युत्पन्नं स
मानार्थं तुल्यमित्रं युधिष्ठिरं अद्विषंतं कथं द्विष्यात्त्वादृशो भरतर्षभ २ तुल्याभिजनवीर्य्यश्च कथं भ्रातुः श्रियं नृप पुत्र
कामयसे मोहान्मैवं भूः शाम्य मा शुच ३ अथ यज्ञविभूतिं तां कांक्षसे भरतर्षभ ऋत्विजस्तव तन्वंतु सप्ततंतुं महाध्वरे ४ एम०
फ२ स१ ८५

समानार्थं तुल्यधनं तुल्यमित्रं तन्मित्राद्रोहिणं अद्विषंतं च त्वामपीति शेषः २ ३ सप्तगायत्र्यादीनि छंदांसि तंतवो यस्य यज्ञस्य तं ४

१० अंतर्वेश्यांयते ११ अध्यापः यस्य कार्यादिकं ऊहापोहकौशलं प्रज्ञा १ नाविनो रिवेत्स्यातं त्र्यं ढितीयो विकल्पः २ आहरिष्यंति राजानस्त
वापि विपुलं धनमित्युक्तं तत्राह भविष्यमिति हस्तं इदानीमेवानुक्षेयं अर्थं घृते न शत्रुश्री हरणरूपं प्रयोजनं तत भविष्यत्काले किं वदसि ३ ननु विदुरो
तेपि ५

आहरिष्यंतिराजानस्तवापिविपुलंधनं प्रीत्याच बहुमानाच्चरत्नान्याभरणानिच ५ अनार्याचरितेतात परस्वस्पृहणं
भृशं स्वसंतुष्टः स्वधर्मस्थोयः सवैसुखमेधते ६ अव्यापारः परार्थेषु नित्योद्योगः स्वकर्मसु रक्षणं समुपात्तानामेतद्वैभवलक्षणं
७ विपत्तिष्वव्यथोदक्षो नित्यमुत्थानवान्नरः अप्रमत्तो विनीतात्मा नित्यं भद्राणि पश्यति ८ बाहूनिवैतान्माछैत्सीः पांडु
पुत्रास्तथैवते भ्रातृणांतद्धनार्थं वैमित्रद्रोहं च माकुरु ९ पांडोः सुतान्माद्विषस्वैह राजन्तथैवते भ्रातधनं समग्रं मित्रद्रोहे
तात महानधर्मः महा पितामहा ये तवैतेषां १० अंतर्वेद्यां ददद्वित्तं कामाननुभवन्प्रियान् क्रीडन्स्त्रीभिर्निरातंकः प्रशाम्य भ
रतर्षभ ११ इति सभापर्वणि दुर्योधनसंतापे दुर्योधन उवाच यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः न स जानाति
शास्त्रार्थं दर्वी सूपरसानिव १ जानन्वैमोहयसि मां नाविनो रिव संयता स्वार्थं किं नावधानं ते उताहो द्वेक्षि मां भवान्
२ न संतीमे धार्तराष्ट्रा येषां त्वमनुशासिता भविष्यमर्थमाख्यासि सर्वदा स्वकृतमात्मनः ३ परनेयोग्रणीर्यस्य समा
र्गान्प्रतिमुह्यति पंथानमनुगच्छेयुः कथं तस्य पदानुगाः ४ राजन्परिणतप्रज्ञो वृद्धसेवी जितेंद्रियः प्रतिपन्नान्स्वका
र्येषु संमोहयसि नो भृशं ५

घृतं नमन्यते इत्याशंक्याह परनेय इति अस्माकमग्रणीस्त्वं विदुर इति ह्नुतीयो मामूरित्यर्थः ४ जानन्नेवाहं न वहितं वदामीति चेत्त्राह राजन्निति मोहमे
वददासि न तु हितं वदसीत्यर्थः ५

धिष्ठितः ३

प्रशाम्यभरतर्षभेतित्व[illegible]दुक्तोवृत्तिरूपोधर्मोविभूषणामस्माकंनेष्टइत्याह लोकेत्याह लोकेत्यादिना ६ ८ १ ननुविप्रियंकर्त्ताशत्रुर्नचपांडवास्तथासंतीत्याशंक्या
ह शत्रुरिति १० १३ ब्राह्मणानांसत्यासिनं १० १४ साधारणीतुल्यावृत्तिर्जीविकाएककामिषत्वमित्यर्थः १५ १७ मानेरोविषचुच्चिकरीमाभूत सत्वचतांबुद्धिमतां
नयोनीतिःस्थितः अयंनयःधीमद्भिःशिरसावोढव्य इत्यर्थः १८ जन्मवृद्धिमिवजन्मप्रभृतिजीवदेहादेर्यावृद्धिःस्वाभाविकीतामिवएधतेवर्द्धते सघोऽस्मदर्थानांवृ

८२

लोकवृत्ताद्राजवृत्तमन्यदाहबृहस्पतिः तस्माद्राज्ञाऽप्रमत्तेनस्वार्थश्चिंत्यःसदैवहि ६ क्षत्रियस्यमहाराजजयेवृत्तिःसमाहिता सवैधर्म
स्त्वधर्मोवास्वैर्वृत्तौकापरीक्षणा ७ प्रकालयेद्दिशःसर्वाःप्रतोदेनेवसारथिः प्रत्यमित्रश्रियंदीप्तांजिघृक्षुर्भरतर्षभ ८ प्रच्छन्नोवाप्रका
शोवायोगोयोऽरिंप्रबाधते तद्वैशस्त्रंशस्त्रविदांनशस्त्रंछेदनंस्मृतं ९ शत्रुश्चैवहिमित्रंचनलेख्यंनचमातृका योवैसंतापयतियं
सशत्रुःप्रोच्यतेनृप १० असंतोषःश्रियोमूलंतस्मात्तंकामयाम्यहं समुच्छ्रयेयोयततेसराजन्परमोनयः ११ ममत्वंहिनकर्त्त
व्यमैश्वर्येवाधनेपिवा पूर्वावाप्तंहरंत्यन्येराजधर्मंहितंविदुः १२ अद्रोहसमयंकृत्वाचिच्छेदनमुचेःशिरः शक्रःसाभिमतातस्य
रिपोवृत्तिःसनातनी १३ द्वावेतौग्रसतेभूमिःसर्पोबिलशयानिव राजानंचाविरोद्धारंब्राह्मणंचाप्रवासिनं १४ नास्तिवैजातितः
शत्रुःपुरुषस्यविशांपते येनसाधारणीवृत्तिःसशत्रुर्नेतरोजनः १५ शत्रुपक्षंसमृध्यंतंयोमोहात्समुपेक्षते व्याधिराप्यायि
तइवतस्यमूलंछिनत्तिसः १६ अल्पोपिह्यरिरत्यर्थंवर्द्धमानःपराक्रमैः वल्मीकोमूलजइवग्रसतेवृक्षमंतिकात् १७ आ
जमीढरिपोर्लक्ष्मीर्मातेरोचिष्टभारत एषभारःसत्ववतांनयःशिरसिधिष्ठितः १८ जन्मवृद्धिमिवार्थानांयोवृद्धिमभिकांक्षते
एधतेज्ञातिषुसवैसद्योवृद्धिर्हिविक्रमः १९ नाप्राप्यपांडवैश्वर्यंसंशयोमेभविष्यति अवाप्स्येवाश्रियंतांहिशेष्येवानिहतो
युधि २० एतादृशस्यकिंमेद्यजीवितेनविशांपते वर्द्धंतेपांडवानित्यंवयंत्वस्थिरवृद्धयः २१ इतिसभापर्वणि १० ॥ छ

द्धिर्योनमःसद्योवृद्धिःविक्रमात् प्राप्येति पांडवैश्वर्यंअप्राप्यअनवाप्य[illegible]अहंस्थितियावत् संशयोवितर्कोनभविष्यति[illegible]नाभविष्यत्तावितर्कोमे
वाहंअवाप्स्येइति पांडवैश्वर्यंद्रष्टाऽहंहतंवामयामर्तव्यंवेत्येववितर्कोजातइत्यर्थः २० अस्थिराःवृद्धिरहिताऽवृद्धः सेपत्नयेषां २१ अध्यायः १०

स० ८६

स० ८६

यांतं १ २ ग्लहानपणान ३ आस्फुरं अक्षविन्यासपातनादिस्थानं ४ ७ नारभेतेतिपरबुद्धिर्विना शायेतिभावः ८ भयंभयशंकाहेतुं घूतादिकंपरि
हरन ९ कल्पःसमर्थः ॥ १० विकारंपूर्वविग्यावृत्तिं अनायसंअलोहजं ११ अनर्थघूतादिमनर्थहेतुं संग्रथनंगुंफनं १२ पुराणोनेत्यादिभिः

शकुनिरुवाच यांत्वमेतांश्रियंदृष्ट्वापांडुपुत्रेयुधिष्ठिरे तप्यसेतांहरिष्यामिघूतेनजयतांवर १ आहूयतांपरंराजन कुंतीपुत्रो
युधिष्ठिरः आगत्वासंशयमहमयुध्वाचचमूमुखे २ अक्षान क्षिपन्नक्षतःसनविद्वानविदुषोजयेत ग्लहानधनूंषिमे
विद्धिशरानक्षांश्चभारत ३ अक्षाणांहृदयंमेज्यारथंविद्धिममास्फुरं ४ दुर्योधनउवाच अयमुत्सहतेराजनश्रि
यमाहर्तुमक्षवि[illegible]त घूतेनपांडुपुत्रेभ्यस्तदनुज्ञातुमर्हसि ५ धृतराष्ट्रउवाच स्थितोस्मिशासने[illegible]भ्रातुर्विदु
रस्यमहात्मनः तेनसंगम्यवेत्स्यामिकार्यस्यास्यविनिश्चयं ६ दुर्योधनउवाच व्यपनेष्यतितेबुद्धिंविदुरोमुक्तसंश
यः पांडवानांहितेयुक्तोनतथाममकौरव ७ नारभेतपरसामर्थ्यात्पुरुषःकार्यमात्मनः मतिसाम्यंद्वयोर्नास्तिकार्येषु
कुरुनंदन ८ भयंपरिहरन्मंदआत्मानंपरिपालयन वर्षासुक्लिन्नकटवत्तिष्ठन्नेवावसीदति ९ नव्याधयोनापि
यमःप्राप्तुंश्रेयःप्रतीक्षते यावदेवभवेत्कल्पस्तावच्छ्रेयःसमाचरेत १० धृतराष्ट्रउवाच सर्वथापुत्रवलिभिर्वि
ग्रहोमेनरोचते वैरंविकारंसृजतितद्धैशस्त्रमनायसं ११ अनर्थमर्थंमन्यसेराजपुत्रसंग्रंथनंकलहस्यातिपा
ति तद्वैप्रवृत्तंतुयथाकथंचित्सृजेदसीन्निशितान्सायकांश्च १२ घूतेपुराणैर्व्यवहारःप्रणीतस्तत्रात्ययोनास्तिन
संप्रहारः तद्रोचतांशकुनेर्वाक्यमघसभांक्षिप्रंत्वमिहाज्ञापयस्व १३ स्वर्गद्वारंदीव्यतांनोविशिष्टंतद्वर्तिनांचापि
तथैवयुक्तं भवेदेवंह्यात्मनातुल्यमेवंदुरोदरंपांडवैस्त्वंकुरुष्व १४

व्यवहारःप्रवृत्तिःप्रणीतःअनुष्ठितः अत्ययोनाशःसंप्रहारोयुद्धं १३ स्वर्गद्वारंस्वर्गहारंशत्रूणामभिभवःधनलाभश्चसुखं तेवसोनवधनेनयज्ञादिद्वारा

प२

उपाक्रम्य संस्मृत्य भाविभवि[ष्य]तं ऐश्वर्यं कर्तुं शीलमस्येति भाविनं श्रेयस्करमित्यर्थः १५ इयं ज्ञातं बुद्धिविधानुगेन बुद्धिः ऊहापोहकौशलं विधा[नं] शास्त्राध्ययनं दिष्टमहानं वा १६ परमं प्रैलादधिकं दुस्तरं यत्नशतेनाप्यपरिहार्यं १७ क्रोशमात्रं आयतां दीर्घां क्रोशमात्रायतां स्फाटिकामिति शेषः

स० ८७

धृतराष्ट्र उवाच वाक्यं न मे रोचते पक्षयोक्तं पत्ते प्रियं तत्क्रियतां नरेंद्र पश्चान्नतप्स्येत दुपक्रम्य वाक्यं न हीदृशं भाविवचो हि धर्म्यं
१५ इयं घ्येत द्विदुरेणैव सर्वं विपश्चिता बुद्धिविधानुगेन तदेवैतत्स्ववशस्याभ्युपैति महद्भयं क्षत्रियजीवघाति १६ वैशंपाय
नउवाच एवमुक्त्वा धृतराष्ट्रो मनीषी दैवं मत्वा परमं दुस्तरं च शशासोच्चैः पुरुषान्पुत्रवाक्ये स्थितो सौ राजा दैवसंमूढचेताः
१७ सहस्रस्तंभां हेमवैडूर्यचित्रां शतद्वारां तोरणस्फाटिकाख्यां सभामग्र्यां क्रोशमात्रायतां मे तद्विस्तारामाशु कुर्वन्तु युक्ताः
१८ श्रुत्वा तस्य त्वरिता निर्विशंकाः प्राज्ञा दक्षास्तां तदा चक्रुराशु सर्वद्रव्याण्युपजह्रुः सभायां सहस्रशः शिल्पिनश्चैव युक्ताः
१९ कालेनाल्पेनाथ निष्ठां गतां तां सभां रम्यां बहुरत्नां विचित्रां चित्रैर्हैमैरासनैरभ्युपेतामाचख्युस्ते तस्य राज्ञः प्रतीताः
२० ततो विद्वान्विदुरं मंत्रिमुख्यमुवाचेदं धृतराष्ट्रो नरेंद्रः युधिष्ठिरं राजपुत्रं च गत्वा मद्वाक्येन क्षिप्रमिहानयस्व २१
सभेयं मे बहुरत्ना विचित्रा शय्यासनैरुपपन्ना महार्हैः सा दृश्यतां भ्रातृभिः सार्धमेत्य सुहृद्द्यूतं वर्ततामत्र चेति २२
इति सभापर्वणि द्यूते

एम० ८७

तद्विस्तारां क्रोशमात्रविस्तारां युक्ताः सन्नद्धाः १८ निष्ठां निष्पन्नत्वं हैमैरासनैरिति पाठे स्वर्णनिर्मितैः कशिपुभिः १९ २० २१ २२ अध्यायः १२

१ प्रैषं आज्ञावचनं द्यूतकृते द्यूतनिमित्तं ३ दिष्टस्य दैवस्य वशे धात्रा स्थापयित्राऽऽत्मं तर्यामिणा प्रयोजकेन इदं जगच्चेष्टति तथा च श्रुतिः एष ह्येवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष वा साधु कर्म कारयति तं यमधो निनीषत इति पूर्वकर्मापेक्षईश एवसति स्वस्ति वामार्गे प्रवर्त्तयतीति श्रुते

वैशंपायन उवाच मतमाज्ञाय पुत्रस्य धृतराष्ट्रो नराधिपः मत्वा च दुस्तरं दैवमेतद्राजंश्चकार ह १ अन्यायेन तथोक्तस्तु वि
दुरो विदुषां वरः नाभ्यनंदद्वचो भ्रातुर्वचनं चेदमब्रवीत् २ विदुर उवाच नाभिनंदे नृपते प्रैषमेतं मैवं कृथाः कुलनाशाद्बि
भेमि पुत्रैर्भिन्नैः कलहस्ते ध्रुवं स्यादेतच्छंके द्यूतकृते नरेंद्र ३ धृतराष्ट्र उवाच नेह क्षत्तः कलहस्तप्स्यते मां न चेद्दैवं प्रति
लोमं भविष्यत् धात्रा तु दिष्टस्य वशे किलेदं सर्वं जगच्चेष्टति न स्वतंत्रं ४ तदद्य विदुर प्राप्य राजानं मम शासनात् क्षिप्रमा
नय दुर्धर्षं कुंतीपुत्रं युधिष्ठिरं ५ इति सभापर्वणि ५ वैशंपायन उवाच ततः प्रायाद्विदुरोश्वैरुदारैर्महाजवैर्बलिभिः सा
धुदांतैः बलान्नियुक्तो धृतराष्ट्रेण राज्ञा मनीषिणां पांडवानां सकाशं १ सोभिपत्य तमध्वानमासाद्य नृपतेः पुरं प्रविवेश
महाबुद्धिः पूज्यमानो द्विजातिभिः २ स राजगृहमासाद्य कुबेरभवनोपमं अभ्यागच्छत धर्मात्मा धर्मपुत्रं युधिष्ठिरं ३
तं वै राजा सत्यधृतिर्महात्मा अजातशत्रुर्विदुरं यथावत् पूजापूर्वं प्रतिगृह्याजमीढस्ततोपृच्छत् धृतराष्ट्रं सपुत्रं ४ युधिष्ठि
र उवाच विज्ञायते ते मनसोऽप्रहर्षः कच्चित् क्षत्तः कुशलेनागतोसि कच्चित्पुत्राः स्थविरस्यानुलोमा वशानुगाश्चापि विशो
थ कच्चित् ५

र्थः तिष्ठतीति पाठे कार्यं अनुतिष्ठतीत्यर्थः ४ ५ अध्यायः ततः तत्पुरमिति संबंधः १ द्विजातिभिस्त्रैवर्णिकैः २ ३ तं प्रति धृतराष्ट्रं अपृच्छत् ४
कुशलेन अस्मत्कुशलहेतोः ५

स॰
८८

आत्मरतिः स्वस्योत्कर्ष एव रतिर्यस्य न तु धर्ममभ्वीक्ष्ते। इति भावः ६ हतात्मेति पाठे कठिनचित्तः ६ अव्ययं धनादेशविनाशं ७ रम्यतां क्रीडाक्रियतां ८ दुरोदराः द्यूत
काराः कितवान् धूर्तान् कपटिन इति यावत् स्त्यागतः इति हेतोः जुषस्व रोचय ९ बुध्यमानः अस्मे जायां परिभिः शंतपस्य पस्याग धर्धदेनेवाज्य १ स्नुः पितामाता

विदुर उवाच राजा महात्मा कुशली सपुत्र आस्ते वृतो ज्ञातिभिरिंद्रकल्पः प्रीतो राजन् पुत्रगणैर्विनीतो विशोक एवात्मरतिर्दृ
ढात्मा ६ इदंतु त्वां कुरुराजोभ्युवाच पूर्वं पृष्ट्वा कुशलं चाव्ययं च इयं सभा त्वत्सभातुल्यरूपा भ्रातॄणां ते दृश्यतामेत्य पुत्र ७
समागम्य भ्रातृभिः पार्थ तस्यां सुहृद्यूतं क्रियतां रम्यतां च प्रीयामहे भवतां संगमेन समागताः कुरवश्चापि सर्वे ८ दुरोदरा वि
हिता ये तु तत्र महात्मना धृतराष्ट्रेण राज्ञा तान् द्रक्ष्यसे कितवान् संनिविष्टानित्यागतोहं नृपते तज्जुषस्व ९ युधिष्ठिर उवाच
द्यूते क्षत्रः कलहो विद्यते नः को वै द्यूतं रोचते बुध्यमानः किं भवान्मन्यसे युक्तरूपं भवद्वाक्ये सर्व एव स्थिताः स्म १० ॥ ७॥

भ्रातरः एनमाकर्ण जानीमो न यतावद्भ्मेत मिति श्रुत्युक्तान् द्यूतदोषान् जानन् अस्त्रः पाशो यस्य वरदेनेवुद्धो अगधतगांडीत्वं तवान्वाजीवे गावान् अद्रैदृ दीव्येर इतिय
स्य बुद्धिः रत्यन्नासस घए वपराभ्यतइत्यर्थः तथापि आज्ञागुरूणां ह्यविचारणीयेति न्यायेन न तत्त्वदुक्तमवश्यमनुतिष्ठे यमित्याह किंवेति सर्वे वयं पांडवाः १० एम॰
८८

द्यूतेकृतेइहलोकहानिः गुर्वाज्ञोल्लंघनेपरलोकहानिः अतःश्रेयःआमुष्मिकंहितंगुर्वाज्ञापालनप्रशस्तंतदेवरेत्यर्थः ११ शतशःशतेनधनेनअसंख्या
तेनेत्यर्थः संनिपत्यसंगम्य १२ अतिअनतिक्रम्यमर्यादांदेवितुंशीलमस्यसःअतिदेवी युष्मदेहयाद्युत्क्रमपिपणीकरीष्यतीत्यर्थः कृतहस्तःपयोध्यंअक्ष
पातनेकुशलःपतोमताद्व्याताद्युतलः पद्माऽतिदेवीकृतहस्तः इत्येवंपदंदेवीराज्ञीद्रौपदीतस्यांकृतोव्यापारितोहस्तोयैस्तेतदतिलाघवंतःदुर्योधनाद्याः ना

विदुरउवाच जानाम्यहंद्यूतमनर्थमूलंकृतश्चयत्नोस्यमयानिवारणे राज्ञाचमांप्राहिणोत्त्वत्सकाशंश्रुत्वाविद्वन्श्रेयइहाचर
स्व ११ युधिष्ठिरउवाच केतत्रान्येकितवादीव्यमानाविनाराज्ञोधृतराष्ट्रस्यपुत्रैः पृच्छामित्वांविदुरब्रूहिनस्तान्येर्दीव्यामःसतते
सन्निपत्य १२ विदुरउवाच गांधारराजःशकुनिर्विशांपतेराजातिदेवीकृतहस्तोमताक्षः विविंशतिश्चित्रसेनश्चराजासत्यव्रतःपु
रुमित्रोजयश्च १३ युधिष्ठिरउवाच महाभयाःकितवाःसन्निविष्टामायाविनोदेवितारोत्रसंति धात्रातुदिष्टस्यवशेकिलेदं
सर्वंजगत्तिष्ठतिनस्वतंत्र १४ नाहंराज्ञोधृतराष्ट्रस्यशासनान्नगंतुमिच्छामिकवेदुरोदरं इष्टोहिपुत्रस्यपितासदैवतदस्मिकर्त्तावि
डुराथमांयथा १५ नचाकामःशकुनिनादेवितांहंनचेन्मांजिष्णुराह्वयितासभायां आहूतोहंननिवर्त्तेकदाचित्तदाहितंशाश्व
तंवैव्रतंमे १६

तव्यतिक्रांतः अतिदेवीकृतहस्तः तेद्रौपदीस्तुर्भिर्वेष्टंतित्रपंडघूतेनहरिष्यतीत्यर्थः १३ महाभयाःमहद्भयंयेभ्यस्ते मायोपधाःकपटपुरस्कारशीलाः
१४ दुरोदरंद्यूतंदुरोदरोद्यूतकारेपणोद्यूतेदुरोदरमितिविश्वः १५ ननिवर्त्ते निवृत्तोमापरेरूपणोपमितिवक्ष्यंतीतिभावः १६ श्रीकृष्णायनमः ॥

प्रायात्रिकं प्रस्थानसाधनं रथादिसहिताया त्राप्रयात्रा तस्यां उपयुक्तं सर्वं प्रायात्रिकं शकटवाम्यादि सगणः भ्रात्रादिगणयुक्तः सानुयात्रः सर्वसेवकयुक्तः आदि
अग्रे तु शीलमस्य तत् आदिकृतां तं मुख्यं कृत्वा विधाय १७ ननु जानं ततो पि कुलक्षयावहार्थं द्यूताय कुतो निर्गता इत्यत आह दैवमिति दैवं प्राक्तनं कर्म धातुः तदनु
पदी

स० ८९

वैशंपायनउवाच एवमुक्त्वा विदुरं धर्मराजः प्रायात्रिकं सर्वमाज्ञाप्य तूर्णं प्रायाच्छोभूते सगणः सानुयात्रः सहस्त्रीभिर्द्रौमादिकृ
त्वा १७ दैवं हि प्रज्ञां मुष्णाति चक्षुस्तेज इवापतत् धातुश्च वशमन्वेति पाशैरिव नरः सितः १८ इत्युक्त्वा प्रययौ राजा सहक्षत्त्रा युधिष्ठिरः
अमृष्यमाणस्तस्याथ समाह्वानमरिंदमः १९ वाह्लीकेन रथं यत्तमास्थाय परवीरहा परिछन्नो ययौ पार्थो भ्रातृभिः सह पांडव २०
राजश्रिया दीप्यमानो ययौ ब्रह्मपुरस्सरः धृतराष्ट्रेण चाहूतः कालेन समयेन च २१ स हास्तिनपुरं गत्वा धृतराष्ट्रगृहं ययौ समि
याय च धर्मात्मा धृतराष्ट्रेण पांडवः २२ तथा भीष्मेण द्रोणेन कर्णेन च कृपेण च समियाय यथान्यायं द्रौणिना च विभुः सह
२३ समेत्य च महाबाहुः सोमदत्तेन चैव ह दुर्योधनेन शल्येन सौवलेन च वीर्यवान् २४ ये चान्ये तत्र राजानः पूर्वमेव समागताः
दुःशासनेन वीरेण सर्वैर्भ्रातृभिरेव च २५ जयद्रथेन च तथा कुरुभिश्चापि सर्वशः ततः सर्वैर्महाबाहुर्भ्रातृभिः परिवारितः १६
प्रविवेश गृहं राज्ञो धृतराष्ट्रस्य धीमतः ददर्श तत्र गांधारीं देवीं पतिमनुव्रतां २६ स्नुषाभिः संवृतां शश्वत्ताराभिरिव रोहि
णीं अभिवाद्य स गांधारीं तया च प्रतिनंदितः ददर्श पितरं वृद्धं प्रज्ञाचक्षुषमीश्वरं २९ ॥ ७ ॥ ७ ॥

रोधेन प्रवर्त्तयिता सितः वद्धः १८ क्षत्त्रा विदुरेण १९ परिच्छन्नः परिवृतः भ्रातृभिः नैम्नसहपरिच्छिन्न इति पाठे अन्यपरिवारः २० ब्रह्मपुरः ब्राह्म मा० ८९
णपुरःसरः कालस्य समयेन संकेतेन अमुकस्मिन् दिने आगंतव्यमित्येवं रूपेण २१ समियाय धृतराष्ट्रेण सह संगतः तेन परिष्वक्त इत्यर्थः २२ २८ ददर्श
पितरं धृतराष्ट्रं प्रतिपुनरागत इत्यर्थः २९

एवमन्येपिचक्रुरित्याहराज्ञेति राज्ञाधृतराष्ट्रेण ३० ३२ प्रमनसः संहृष्टचित्ताः ३३ संविदं मिथःकथां व्यायामः श्रमः पूर्वोयेषां तानि प्रतिकर्म केशप्रसाधनादि

राज्ञामर्हं सुपाप्य ताश्च ते च कौरवनंदनाः चत्वारः पांडवा राजन्भीमसेनपुरोगमाः ३० ततो हर्षः समभवत्कौरवाणां विशांपते तान्दृष्ट्वा पुरुषव्याघ्रान्पांडवान्प्रियदर्शनात् ३१ विविशुस्तेप्यनुज्ञातारत्नवंति गृहाणि च ददृशुश्चोपयातांस्तान्द्रौपदीप्रमुखाः स्त्रियः ३२ याज्ञसेन्याः परामृद्धिं दृष्ट्वा प्रज्वलितामिव स्नुषास्ता धृतराष्ट्रस्य नातिप्रमनसोभवन् ३३ ततस्ते पुरुषव्याघ्रा गत्वा स्त्रीभिस्तु संविदं कृत्वा व्यायामपूर्वाणि कृत्यानि प्रतिकर्म च ३४ ततः कृताह्निकाः सर्वे दिव्यचंदनभूषिताः कल्याणमनसश्चैव ब्राह्मणान्स्वस्तिवाच्य च मनोज्ञमशनं भुक्त्वा विविशुः शरणान्यथ ३५ उपगीयमाना नारीभिरस्वपन्कुरुपुंगवाः अनंतरं च तत्प्राप्य प्रीत्याः परपुरंजयाः ३६ जगाम तेषां सा रात्रिः पुण्या रतिविहारिणां स्तूयमानाश्च विश्रांताः काले निद्रामथात्यजन् ३७ सुखोषितास्ते रजनीं प्रातः सर्वे कृताह्निकाः सभां रम्यां प्रविविशुः कितवैरभिनंदिताः ३८ इतिसभापर्वणि द्यूते

परिष्कारं ३४ ३५ रतिविहारिणां स्त्रीसंगेन क्रीडतां ३७ ३८ सभायां द्यूतेऽध्यायः ॥ ५८ ॥ ५८ ॥ ५८ ॥ॐ॥ ५८ ॥

स० ६० प्रविश्य १ संमेयानाः यथार्हं आशीर्नत्यादिना संगतिं कुर्वाणाः स्पर्ध्यानि स्पर्द्धाकारणि यस्यात्तां स्पृहणीयानीति यावत् २ ३ उपस्तीर्णा आस्तृणा वे
नाक्षपातनवाससा उपरिस्तीर्णा कृतक्षणाः कृतसंकेताः उप्त्वा पातयित्वा ४ निकृतिः वंचनं देवनं द्यूतं पापं पापहेतुः यतो न च नीतिः द्यूते सत्यं नास्तीत्यर्थः ५
निकृतौ शाठ्ये एवं शाठ्येन संख्यां सम्यकृत्वा नं जयपराजयव्यवहारविवेकं ६ निकृतौ श्लेषपरेण क्षिप्यमाणे विधिज्ञः द्यूतेतिकर्तव्यताभिज्ञः यश्च महामतिः जया

वैशंपायन उवाच प्रविश्य तां सभां पार्था युधिष्ठिरपुरोगमाः समेत्य पार्थिवान्सर्वान्पूजार्हानभिपूज्य च १ यथावयः समेयाना
उपविष्टा यथार्हतः आसनेषु विचित्रेषु स्पर्ध्यास्तरणवत्सु च २ तेषु तत्रोपविष्टेषु सर्वेष्वथ नृपेषु च शकुनिः सौबलस्त
त्र युधिष्ठिरमभाषत ३ शकुनिरुवाच उपास्तीर्णा सभा राजन्सर्वे त्वयि कृतक्षणाः अक्षानुप्त्वा देवनस्य समयोस्तु युधि
ष्ठिर ४ युधिष्ठिर उवाच निकृतिर्देवनं पापं न क्षात्रोत्र पराक्रमः न च नीतिर्ध्रुवा राजन्किं त्वं द्यूतं प्रशंससि ५ न हि
मानं प्रशंसंति निकृतौ कितवस्य हि शकुने मैव नो जैषीरमार्गेण नृशंसवत् ६ शकुनिरुवाच यो वेत्ति संख्यां निकृतौ विधि
ज्ञश्चेष्टास्वखिन्नः कितवोक्षजासु महामतिर्यश्च जानाति द्यूतं स सर्वं सहते प्रक्रियासु ७ अक्षग्लहः सोभिभवेत्परं नस्तेनैव
दोषो भवतीह पार्थ दीव्यामहे पार्थिव मा विशंकां कुरुष्व पाणं च चिरं च मा कृथाः ८ ॥ छ ॥ छ ॥ छ ॥

व१ सर्वे२

वहं पराक्रत्वा पराजयावहं चिकित्सति सः द्यूतं जानाति स च प्रक्रियासु द्यूतक्रियासु सर्वं कर्तुं सहते ७ यत्तु देवनं पापमित्युक्तं तत्राह अक्षग्लह इति पाशाधीनो सभा०
ग्लहः पणो जयपराजयरूपो व्यवहारः सः प्रतिकूलश्चेत्तनः युष्माकं अस्माकं च दीव्यतां मध्ये परं अभिभवेत् तेनैव अक्षग्लहेनैव दोषः पराभवाख्यो भवति न तत्र ६०
लेशः पाकपटं कर्तुं शक्यं दैवाधीनत्वादक्षपातस्येत्यर्थः पाणं पणनीयं द्रव्यं च कुरुष्व वचनेन प्रत्यक्षेण वा पणः कुरुष्वेत्यर्थः ८ ॥ छ ॥ छ ॥

अयं असितः यः लोकद्वाराणि स्वर्गापवर्गप्रापकाणि कर्माणि नारीनिम्नाम्पति तेषु संचरति सोऽयं एवमाहेति संबंधः ९ द्विविधं देवनं अदैः श्व तत्राद्यं निंदित्वा
ऽपरं प्रशंसति इदं वा इति १० म्लेच्छंति अपशब्दं कुर्वंति भाषाभिः गीर्भिः मायया कपटेन न चरंति न कर्म कुर्वन्ति वाचा देहेन च कौटिल्यं न कुर्वंतीति भावः । अतएव
वजिह्मं अकुटिलं अशठं कुटिलपुरुषहीनं ११ ब्राह्मणार्थाय ब्राह्मणप्रयोजनाय शिक्षितुं विद्यामुपादातुं प्रयतामहे येन वित्तेन [illegible] तद्वित्तं अपहर्तुं मा ति

युधिष्ठिर उवाच एवमाह्वयमसितो देवलो मुनिसत्तमः इमानि लोकद्वाराणि यो वै संचरते सदा ९ इदं वै देवनं पापं निकृत्या कितवैः सह धर्मेण तु जयो युद्धे तत्परं न तु देवनं १० नार्या म्लेच्छंति भाषाभिर्मायया न चरंत्युत अजिह्ममशठं युद्धमेतत्सत्पुरुषव्रतं ११ वेयतशक्तितो विप्रान् रक्षितुं प्रयतामहे तद्वै वित्तं मातिदेवीर्मा जैषीः शकुने परान् १२ निकृत्या कामये नाहं सुखान्युत धनानि वा कितवस्याप्यनिकृतेर्वृत्तमेतन्न शस्यते १३ शकुनिरुवाच श्रोत्रियः श्रोत्रियानेति निकृत्यैव युधिष्ठिर विद्वानविदुषोऽभ्येति नाहुस्तां निकृतिं जनाः १४

देवीः सर्वस्वपणीकरणेन अतिघृतं मा जय्याः १२ ननु द्यूते ताधीनो जय इत्याशंक्याह निकृत्येति निकृत्या नीचकर्मणा इह कितवस्य एतद्
वृत्तं कृतिनः न पूज्यते । सतां न प्रशस्यमित्यर्थः । निकृत्या जिगीषा खेन नीचकर्मणा वहति मे अकृताकर्त्तानि युद्धे त्वे न संत्वे न पर्यत्थे इति मे अत्र वर्णाति युद्धे न वादे
न वा जिगीषा नीचमेव कर्म तथापि जनाः व्यावहारिकाः लोकास्तां जिगीषया शत्रुं प्रति गतिं निकृतिं नीचकर्मत्वेन नाहुः अनुते विरिक्त विषयत्वादित्यर्थः अकृता
कर्त्तुमयोग्यानि कर्त्तानि कर्त्तव्यानि भविष्यंति तान्येव आकत्वेन एके न युद्धे त्वेन संपद्यते इति अनुत्यर्थः १३ १४ ॥ ६७ ॥ ६७ ॥ ६७ ॥

दाहीति कस्मात् अर्हेरिति १६ एवंत्वं निह्नुतिं छलं मन्यसे तर्हि श्रोत्रियात् श्रोत्रिय इव विद्यावतो मन्त्रोपराभवभीतस्त्वं द्यूतान्निवर्तस्वेत्यर्थः १७ विधि
स० ६१ ःकार्यपितां इत्यस्मि दिष्टं दैवं १८ प्रतिपणश्च कोन्योस्ति प्रतिपणः पणप्रतिभूः तवात्यधनत्वात् मनुष्योधनिकः कोन्यो देविता स्तीति भावः पण श्चैवदि

अर्हेर्हिंसितो ह्येति निह्नुत्यैव युधिष्ठिरः विद्वानविदुषोभ्येति नाहुस्तां निह्नुतिं जनाः १५ अकृतास्त्रं कृतास्त्रं च दुर्बलं बलवत्तरः एवं कर्मसु सर्वेषु निह्नुत्यैव युधिष्ठिर १६ एवं त्वं मामिहाभ्येत्य निह्नुतिं यदि मन्यसे देवनाद्विनिवर्तस्व यदि ते विद्यते भयम्
१७ युधिष्ठिर उवाच आहूतो न निवर्तेयमिति मे व्रतमाहितम् विधिश्च बलवान्राजन्दिष्टस्यास्मि वशे स्थितः १८ अस्मिन्समागमे केन देवनं मे भविष्यति प्रतिपाणश्च कोन्योस्ति ततो द्यूतं प्रवर्तताम् १९ दुर्योधन उवाच अहं दातास्मि रत्नानां धनानां च विशांपते मदर्थे देविता चायं शकुनिर्मातुलो मम २० युधिष्ठिर उवाच अन्येनान्यस्य वै द्यूतं विषमं प्रतिभाति मे
एतद्विद्वन्नुपादत्स्व काममेवं प्रवर्तताम् २१

कोन्यस्त इति पाठे तु पणः पणानकर्ता कोन्यस्त्वत्त्वयामत्सुमुखे इति शेषः तव मया सदेवितुमनर्हत्वादिति भावः १९ २० २१ ॥ छ ॥ छ ॥ छ ॥ राम० ६१

उपोह्यमानेउपस्थाप्यमाने १ ६ प्रतिपाद्यः एतत्तुल्यमौल्यं द्यूतार्थं स्थापितं वस्तु ७ दुरोदरं पणं मत्सरः अर्थेषु तत्पणस्थापितेषु हीनमौल्यत्वादिदोष

वैशंपायनउवाच उपोह्यमाने द्यूते तु राजानः सर्वएवते धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां ततः १ भीष्मोद्रोणः कृप श्चैव विदुरश्च महामतिः नातिप्रीतेन मनसा तेन्ववर्तन्त भारत २ ते द्वंद्वशः पृथक् चैव सिंहग्रीवा महौजसः सिंहासना नि भूरीणि विचित्राणि च भेजिरे ३ शुशुभे सा सभा राजन् राजभिस्तैः समागतैः देवैरिव महाभागैः समवेतैस्त्रिविष्टपं ४ सर्वे वेदविदः शूराः सर्वे भास्वरमूर्तयः प्रावर्तत महाराज सुहृद्द्यूतमनंतरं ५ युधिष्ठिरउवाच अयं वहुधनो राजन् साग रावर्तसंभवः मणिर्हारोत्तरः श्रीमान्‌ कनकोत्तमभूषणः ६ एतद्राजन्‌ मम धनं प्रतिपाद्योस्ति कस्तव येन मां त्वं महारा ज धनेन प्रतिदीव्यसे ७ दुर्योधनउवाच संति मे मणयश्चैव धनानि सुवहूनि च मत्सरश्च न मेर्थेषु जयस्वैनं दुरोदरं ८ वैशंपा यनउवाच ततो जग्राह शकुनिस्तानक्षानक्षतत्त्ववित् जितमित्येव शकुनिर्युधिष्ठिरमभाषत ९ इति सभापर्वणि द्यूते यु धिष्ठिरउवाच मत्तः कैतवकेनैव यज्जितोस्मि दुरोदरे शकुने हंत दीव्यामो ग्लहमानाः परस्परं १० ॥ छ ॥ छ ॥

न १

युद्धिः ८ ९ अध्यायः मत्तः कैतवकेन कितवेषु विदितेन कपटेन अरीहणात् दिव्याद्धुत मत्तः गर्वितः १ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥

साष्टपलशतं सुवर्णनिष्कः भांडिनो मंजूषाः कुंडिनामिति पाठे कुंडिनः पात्रविशेषाः परिताः हिरण्यं धनं जातरूपं अकुप्यं सुवर्णरौप्यात्म २ ३ सहस्रसमि
तः सहस्रसंख्यतुल्यः वैयाघ्रः व्याघ्रचर्मावनद्धः सुचक्रोपस्कर इति पाठे स्वस्य चक्रं समुदायः तत्र उपस्करः उल्लासादिनाशः अप्रतिकारे यल्लोपे नसः किंकिणीनां क्षुद्रघंटि

स॰ ६२

संति निष्कसहस्रस्य कुंडिन्यो भरिताः शुभाः कोषो हिरण्यमक्षय्यं जातरूपमनेकशः २ एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया वै
शंपायन उवाच कौरवाणां कुलकरं ज्येष्ठं पांडवमच्युत इत्युक्तः शकुनिः प्राह जितमित्येव तं नृपं ३ युधिष्ठिर उवाच अयं सह
स्रसमितो वैयाघ्रः सुप्रतिष्ठितः सुचक्रोपस्करः श्रीमान किंकिणीजालमंडितः ४ संह्रादनो राजरथो य इहास्मानुपावहत
जैत्रो रथवरः पुण्यो मेघसागरनिःस्वनः ५ अष्टौ यं कुररच्छायाः सदश्वा राष्ट्रसंमताः वहंति येन दिशं तेस्य शांतः चरणो
र्मही एतद्राजन्धनं मह्यं तेन दीव्याम्यहं त्वया ६ वैशंपायन उवाच एवं श्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जितमित्ये
व शकुनिर्युधिष्ठिरमभाषत ७

कानां जालेन संवृतः ४ उपावहत् आनीतवान् ५ कुररः पक्षिविशेषः तेन तुल्यप्रभाः कुररच्छायाः कुमुदच्छायाः कुमुदच्छाया इति पाठांतरं एषां पयत
भूमौ न्यस्तात् भूमिमुपस्पृशन् भूचरः न मुच्येत अतिदूरस्थोपि भूचरः एषां पादाक्रांत एव भवतीत्यर्थः येन मुच्यंते पदा भूमिमुपस्पृशामिति पाठे उपस्पृ सभा॰ ६२
शन्नित्येकत्वमार्षं भूचराः येन मुच्यंते अतिक्रम्यंते इत्यर्थः ६ ७

हेममद्रिकाः हेममयाः भद्रिकाः मांगलिकालंकाराः मंगलसूत्रादयो यासां ताः कंववः शंखवलयानि निष्को वक्षोभूषणं ८ चतुःषष्टिषु कलासु विशारदा कलानां नामानि तु श्रीमद्भागवतदशमस्कंधटीकायां श्रीधरस्वामिभिर्दर्शितानि ९ स्नातकादीनां अनुसेवां पादप्रक्षालनादिरूपां सेवाम् अनु पश्चात् चरंति प
रिचरंति सामगीतिः प्रीत्युत्पादनेवा १० ११ प्रावारवसनाः पटांवराच्छादनाः [illegible] १२ १४ नागाः गजाः हेमकक्षाः गजरज्जवः कृतापीडाः

युधिष्ठिरउवाच शतं दासीसहस्राणि तरुण्यो हेमभद्रिकाः कंवुकेयूरधारिण्यो निष्ककंठ्यः स्वलंकृताः ८ महार्हमाल्या
भरणाः सुवस्त्राश्चंदनोक्षिताः मणीन्हेम च विभ्रत्यः सर्वा वै सूक्ष्मवाससः अनुसेवां चरंतीमाः कुशला नृत्तसामसु स्नातका
नाममात्यानां राज्ञां च मम पार्थिव एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया १० वैशंपायनउवाच एतच्छ्रुत्वा व्यवसितो
निकृतिं समुपाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत ११ युधिष्ठिरउवाच एतावंति च दासानां सहस्राण्युत संति
मे प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा १२ प्राज्ञा मेधाविनो दांता युवानो मृष्टकुंडलाः पात्रीहस्ता दिवारात्रमतिथी
न्भोजयंत्युत १३ एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया वैशंपायनउवाच एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः
जितमित्येव शकुनिर्युधिष्ठिरमभाषत १४ युधिष्ठिरउवाच सहस्रसंख्या नागा मे मत्तास्तिष्ठंति सौवल हेमकक्षाः कृतापी
डाः पद्मिनो हेममालिनः १५ सुदांता राजवहनाः सर्वशब्दक्षमा युधि ईषादंता महाकायाः सर्वे चाष्टकरेणवः १६ सर्वे च
पुरभेत्तारो नवमेघनिभा गजाः एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया १७ वैशंपायनउवाच इत्येवं वादिनं पार्थं प्रहसन्निव
सौवलः जितमित्येव शकुनिर्युधिष्ठिरमभाषत युधिष्ठिरउवाच रथास्तावंत एवेमे हेम[illegible]दंडाः पताकिनः हयैर्विनी पा
तैः संपन्ना रथिभिश्चित्रयोधिभिः १९ एकैको ह्यत्र लभते सहस्रपरमां भृतिं युध्यतो युध्यतो वापि वेतनं मासकालिकं २०
कृतभूषणाः पद्मिनः गलगंडस्थलादिषु पद्मचिह्निताः हेममालिनः स्वर्णमालावंतः १५ ईषा लांगलदंडः अष्टकरेणवः अष्टहस्तिनीकाः १६ १८ दंड
ध्वजदंडः १९ भृतिर्वेतनं तच्च मासकालिकं नत्वाह्निकं वार्षिकं वेति वक्तुं पुनर्वेतनग्रहणं २० दुरात्मवान् दुष्टचित्तः ३१ ॥ ६७ ॥

एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया वैशं इत्येवमु
केवलेनैव [illegible]ष्टाक्षरा २१

युद्धि १

ताम्रलोहैः परिवृताः ताम्रभाजनेषु लोहभाजनेषु चर्मसु खेषु निरुता इत्यर्थः निधि निर्देपद्मं अहृतस्य केवलस्य श्लो० ३२ अध्यायः एवं १ २ हाव

स० ६३ जितमित्येव शकुनिर्युधिष्ठिरमभाषत २२ युधिष्ठिर उवाच अश्वांस्तित्तिरकल्माषान् गंधर्वाद्धेमं मालिनः ददौ चित्ररथस्तु
ष्टो पास्तान् गांडीवधन्वने २३ युद्धे जितः पराभूतः प्रीतिपूर्वमरिंदमः एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया २४ वैशंपायन उ
वाच एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत २५ युधिष्ठिर उवाच रथानां
शकटानां च श्रेष्ठानां चायुतानि मे युक्तान्येव हि तिष्ठंति वाहैरुच्चावचैस्तथा २६ एवं वर्णाः सवर्णाः स्व समुच्चीय सहस्र
शः तथा समुदिता वीराः सर्वे वीरपराक्रमाः क्षीरं पिबंतस्तिष्ठंति भुंजानाः शालितंडुलान् षष्टिस्तानि सहस्राणि सर्वे विपु
लवक्षसः एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया २७ वैशंपायन उवाच एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जितमि
त्येव शकुनिर्युधिष्ठिरमभाषत २८ युधिष्ठिर उवाच ताम्रलोहैः परिवृता निधयो मे चतुःशताः पंचद्रौणिक एकैकः सुव
र्णस्याहतस्य वै ३० जातरूपस्य मुख्यस्य अनर्घेयस्य भारत एतद्राजन्मम धनं तेन दीव्याम्यहं त्वया ३१ वैशंपायन उवाच ए
तच्छ्रुत्वा व्यसितो निकृतिं समुपाश्रितः जितमित्येव शकुनि र्युधिष्ठिरमभाषत ३२ इति सभापर्वणि घ... वैशं एवं प्रवर्ति
ते द्यूते घोरे सर्वापहारिणि सर्वसंशयनिर्मोक्ता विदुरो वाक्यमब्रवीत् ३३ विदुर उवाच महाराज विजानीहि यत्त्वां वक्ष्यामि
भारत मुमूर्षोरौषधमिव न रोचेतापि ते श्रुतं २ यद्वै पुरा जातमात्रो रुराव गोमायुवद्विस्वरं पापचेताः दुर्योधनो भारतानां
कुलघ्नः सोयं कृभवता कालहेतुः ३ गृहे वसंतं गोमायुं त्वं वै मोहान्न बुध्यसे दुर्योधनस्य रूपेण शृणु काव्यां गिरं मम ४ ॥ एम० ६३
शवं कृतवान् ३ काव्यां कविना शुक्रेणोक्तां नीतिगिरं ४ श्री... नमः ॥ छ ॥ छ ॥

माध्वीकः मधु पण्यवान् प्रतापं मधुं प्रपतं तस्मादिति व्युत्पत्तेः मज्जति तत्रैव मधुनि निमग्नो भवतीति ततः प्रपतनं चाधिगच्छति मधुवत् मधुनेव ५ मन्त्रो विवशः
६ ७ नियोगात् दैवयोगात् ८ ९ चित्रवर्हान् मयूरान् १० ११ जंभत्यागे जंभत्यागनिमित्तं सर्वहः सर्वभावज्ञः सर्वेषां प्राणिनां भावं चित्ताशयं जा

६१

मधु वै माध्विको लब्ध्वा प्रपातं नैव बुध्यते आरुह्य तं स मज्जति वा पतनं वाधिगच्छति ५ सोयं मन्त्रो हितेन मधुवन्नपरीक्ष्य से प्र
पातं बुध्यते नैव वैरं कृत्वा महारथैः ६ विदितं ते महाप्राज्ञ भोजेष्वेवासमंजसं पुत्रं संत्यक्तवान् पूर्वं पौराणां हितकाम्यया ७
अंधकायादवा भोजाः समेताः कंसमत्यजन् नियोगात्तु हते तस्मिन् कृष्णेनामित्रघातिना ८ एवं ते ज्ञातयः सर्वे मोदमानाः
शतं समाः त्वन्नियुक्तः सव्यसाची निगृह्णातु सुयोधनं ९ निग्रहादस्य पापस्य मोदंतां कुरवः सुखं काकेनेमांश्चित्रवर्हान् शा
र्दूलान् क्रोष्टुकेन च क्रीणीष्व पांडवान् राजन् मा मज्जीः शोकसागरे १० त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ग्रामं जन
पदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ११ सर्वज्ञः सर्वभावज्ञः सर्वशत्रुभयंकरः इति स्म भाषते काव्यो जंभत्यागे महासुरान् १२
हिरण्यष्ठीविनः कांश्चित्पक्षिणो वनगोचरान् गृहे किल कृतावासान् लोभाद्राजान्वपीडयत् स चोपभोगलोभांधो हिरण्यार्थी
परंतप १३

नातीतितथा भूतं काव्यः शुक्रः अयं सर्वशत्रुभयंकर इति भाषते सर्वेषां स्वपरपक्षाणां शत्रुश्च भयंकरश्चेति स तथा त्यजेत्कुलार्थे पुरुषमिति भाषत इ
तिवान्वयः १२ न्यपीडयत् हतवान् लोभात् मांसलोभात् १३

स०
६४

आयतिंउत्तरकालंपरलोकंउपकारिणांवधात्त्वनाशयत तदात्वंसांप्रतं इहापिसुखप्राप्यंधनंव्यनाशयत १४ पक्ष्विहापङ्क्षिघ्नः ततस्मात्त्अर्थकामःध
नकामःपुष्पमिवपुष्पंउपहार्यंधनं १५ अंगारकारीवृक्षशाखांतानिघर्षत्तोनवधुत्पादकोवापुरिवत्वंएतेषांपरस्परसंघर्षणेनकुलक्षयंमाकुरु इत्यर्थः

आयतिंचतदात्वंचउभेसघोव्यनाशयत तथाकामःपांडवांस्त्वमाद्रुहःकुरुसत्तम १४ मोहात्मानव्यपसेपश्चात्यद्विहापुरुषो
यथा जातंजातंपांडवेभ्यःपुष्पमादत्स्वभारत १५ मालाकारइवारामेस्नेहंकुर्वन्पुनःपुनः वृक्षानंगारकारीवमैनानधाक्षीः
समूलकान १६ मागमःससुतामात्यःसबलश्चपराजयं समवेतानहिकःपार्थान्प्रतियुध्येतभारत मरुद्भिःसहितोराजन्नपि
साक्षान्मरुत्पतिः १७ इतिसभापर्वणिद्यूते विदुरउवाच द्यूतंमूलंकलहस्याभ्युपैतिमिथोभेदंसहतेदारुणाय तदास्थितो
यंधतराष्ट्रस्यपुत्रोदुर्योधनःसृजतेवैरमुग्रं १ प्रातिपेयाःशांतनवाभीमसेनाःसबाह्लिकाः दुर्योधनापराधेनकृच्छ्रंप्रा
प्स्यंतिसर्वशः दुर्योधनोमदेनैवक्षेमंराष्ट्रान्नव्यपोहति २

१६ १७ अध्यायः द्यूतं मयाप्रअभ्युपैतीतिसंबंधः १ प्रातिपेयाःप्रतीयान्वयजाः कृच्छ्रंसंकटं क्षेमंअपोहति राष्ट्रमुपप्लुतंकरोतीत्यर्थः २ २ ॥ एम०
६४

आरुजतेभंगंनयति त्मनः आत्मनः पूर्वरूपमार्ष ३ अन्वेति अनुसरति कविः कांतदर्शी स्वांदृष्टिं कांतदर्शित्विं बालनेत्रां अप्युत्पन्ननेत्रुकां ४ ग्लहतेपणांक
रोति प्रीयायसे अतिशयेनप्रीयसे यङ् तोयं अप्रथमस्यापि यकारस्यद्वित्वमार्ष प्रियायसइति ह्रस्वपाठे अप्रियमिव आचरसे अतिनर्मऽतिविनोदएवांते संप्रह
रोयुद्धंजायते युद्धरूपेणा[ये]णापरिणामते अतः समुन्मज्जतिसंप्रहारइतिपाठे ५ आकर्षस्तेऽवाक्फलः सुप्रणीतः आकर्षोघूतं अवाकुनीचगामिफलंयस्य

विषाणांगोरिवमद्यात्वयमारुजतेबलात ३ यश्चित्तमन्वेतिपरस्यराजनवीरः कविः स्वामवमन्यदृष्टिं नावंसमुद्रेइवबालनेत्रा
मारुह्यघोरेव्यसनेनिमज्जेत ४ दुर्योधनोग्लहतेपांडवेनप्रीयायसेत्वंजयतीतितच्च अतिनर्मज्जायतेसंप्रहारोयतोविना
शः समुपैतिपुंसां ५ आकर्षस्तेवाक्फलः सुप्रणीतो हृदिप्रौढोमंत्रपदोत्समाधिः युधिष्ठिरेणाकलहस्तवायमचिंतितोभि
मतः स्वबंधुना ६

सोवाक्फलः हानिमत्पुनरकप्रदइत्यर्थः सुप्रणीतः सम्यक्प्रणीतउपस्थापितः शकुनिनेत्युपहासः आकर्षः शारिफलके पाशके घूतइंद्रियेइतिविश्वः आकर्षे[.]स्वे
धनेकुप्रणीतइतिपाठेस्वधनंराज्यपुत्रादि तत्र आकर्षं धास्यायाकर्षणसाधनं काष्ठादिमयोहस्तः कुत्सितेनशकुनिनाप्रणीतः यतोऽयंघूतरूपः समाधि
र्नियमः मंत्रपदोमंत्रपूर्वकोभवतांहृदिप्ररूढः किंतावत्तेत्यत आह युधिष्ठिरेणेति अयमेव आकर्षः कलहः कलहरूपैणास्यतइत्यर्थः ६ ॥ ७ ॥
रापदि १

स० ९५ तत्फलमाहुप्रातिपेयाइति काव्यांकविनादीर्घदर्शिनामयाईरितांमंदंदुर्योधिनं मात्यगाहइतिपाठेकःयुष्माकंमध्येकश्चिदिमंकलहंवैश्वानरंमात्यगातअतिक्रम्पमा
गात किंतुअर्वागेवशाम्पध्वमित्याहोत्तरार्द्धेन ७ अपुद्धेनप्रशामयस्वेतिराजानंप्रातिअक्तं युद्धेकोदोषइत्यतआहयदेति द्वीपइवद्वीपः आपत्समुद्रेमज्जता
माश्रयः ८ प्रभवउत्पत्तिःयावदिच्छेस्तावत्तेधनमस्तीत्यर्थः अत्यंततत्प्राप्यफलेत्याहवद्भिति जयन्अजयःजितवान किंतेनतततःस्यान्नकिमपिअतोहेतोः

प्रातिपेयाः शांतनवाःअएधंकाव्यांवाचंसंसदिकौरवाणां वैश्वानरंप्रज्वलितंसुघोरंमायास्यधंमंदमनुप्रपन्नाः यदाभ
न्युपांडवोजातशत्रुर्नसंपच्छेदद्दमदाभिभूतः वृकोदरःसव्यसाचीयमौचकोत्रद्वीपःस्यात्तुमुलेवस्तदानीं ८ महाराजप्रभव
स्त्वंधनानांपुराद्यूतान्मनसायावदिच्छेः बहुवित्तान्पांडवांश्चेज्जयेस्त्वंकिंतेनस्याद्वसुविंदेहपार्थान ९ जानीमहेदेवितंसौबल
स्यवेदद्यूतेनिकृतिंपार्वतीयः यतःप्राप्तःशकुनिस्तत्रपातुमायुयुत्सोभारततपार्वतीयान १० इतिसभापर्वणिद्यूते ॥ ७॥

वसुविंदेहपार्थानपार्थानेवधनरूपेणाविंदलभस्व वसुजित्वेहपार्थानितिपाठेवसुजित्वावसुज यशीलःअन्येभ्योपिदस्यंतइतिजयतेः क्वनिप् तादृशस्तेपार्थाने
वईहईहस्वाइच्छाविषयानकुरुतेनैवमहान्लाभइत्यर्थः ९ वेदजानीतेनिकृतिंछलं मायुधःमायोधय १० अध्यायः ॥ ७ ॥ ७ ॥ ७ ॥ स० ९५

यत्प्रियः येप्रियायस्य वालानमन्यसे अस्मिन्पादेऽध्यएधिकसमार्षं १ सइति अन्यत्र एखजयेऽनिष्टपराजयेचकामोभिलाषोयस्यसः अन्यत्रकाम
ःविज्ञेयतत्रलिंगं इष्टप्रशंसा अनिष्टनिंदाचेत्याहनिंदेति तेतवजिह्वाकथं हृदयं हृदिस्थं अस्मासुद्वेषं व्यनक्ति अत्रवाच्यमपिप्रकटयतीत्यर्थः जिह्वामन
स्तेहृदयंव्यनक्तिज्यायोंतरान्मनसःप्रातिकूल्यमितिपाठेजिह्वावागिंद्रियंततस्तदितंमनःतत्प्रवर्त्तकं मंतःकरणंततस्तेनवहृदयंवुद्धिंज्याशयंकथं व्यनक्ति

सानिवा १

दुर्योधनउवाच परेषामेवयशसाश्लाघसेत्वंसदाछन्नःकुत्सयनधार्तराष्ट्रान जानीमहेविदुरयत्प्रियस्त्वंवालानिवास्मानवमन्य
सेत्वं १ सुविज्ञेयःपुरुषोन्यत्रकामोनिंदाप्रशंसेहितथायुनक्ति जिह्वामनस्तेहृदयंव्यनक्तिज्यायोचरान्मनसःप्राति
कूल्यं २ उत्संगेचव्यालइवाहितोसिमार्जारवत्पोषकंचोपहंसि भर्तृघ्नत्वान्नहिपापीयमाहुस्तस्मात्क्षत्तःकिंनविभेषि
पापात ३ जित्वाशत्रून्फलमाप्तंमहन्नोमास्मानक्षत्तःपरुषाणीहवोचत द्विषद्भिस्त्वंसंप्रयोगाभिनंदीमुहुर्द्वेषंयासि
नःसंप्रमोहात ४

यतःअंतरात्मनमहः अपेक्ष्यावाक्यंवाच्यःप्रातिकूल्यंज्यायः विद्यमानोप्यस्मासुद्वेषःलोकलज्जाभयात्त्वयावाचानवक्तव्यइत्यर्थः २ एतदेवाहउत्सं
गेत्वेति पापीयःपापातरंभर्तृघ्नत्वात्साभिद्रोहात ३ संप्रयोगएकसख्यमित्यर्थः संप्रयोगात्अस्माभिःसहसख्यंकृत्वातान्प्रशंसनमुहुःवारंवा
रंद्वेषंयासिअस्मद्द्वेष्योभवसीत्यर्थः संप्रमोहादित्यपिपाठः तेषांसखाभूत्वामोहादस्माभिःसहद्वेषंकरोषिसंवंधस्यसाम्येसत्यतरतुकमित्यर्थः ४

अक्षमं रुक्तमयोग्यं निगूहते गुह्यं सदैव पितृत्वं त्वत्तत्र काशय सीति भावः तदाश्रितः पार्थिवैश्रितः पार्थिवं धनराष्ट्रं प्राप्नोति यथेष्टं भाषसे ५ अहं दुर्योधनः कर्णैरिति
त्वमामंस्था मामनयस्त्व मावमंस्था इति पाठे माभिति शेषः ६ तितिक्षु तरक्षुभावतः ह्रिएदरूपपत्तात्रास्मा कमपराधात् इत्यर्थः ७ कर्त्तार्हि कर्त्तेत्यत आह

सं०
९६

अमित्रतां याति नरोऽक्षमं ब्रुवन्निगूहते गुह्यममित्रसंस्तवे तदाश्रितोऽपत्रप किन्नु बाधसे यदिष्टमित्थं तदिहाभिभाषसे ५
मा नोऽवमंस्था विद्म मनस्त्वदीयं शिक्षस्व बुद्धिं स्थविराणां सकाशात् यशो रक्षस्व विदुर संप्रणीतं मा व्यापृतः परकार्येषु भू-
स्त्वं ६ अहं कर्त्तेति विदुर मावमंस्था मा नो नित्यं परुषाणीह वोचः न त्वां पृच्छामि विदुर यद्धितं मे स्वस्ति क्षत्तर्मा तितिक्षू-
न्क्षिणु त्वं ७ एकः शास्ता न द्वितीयोऽस्ति शास्ता गर्भे शयानं पुरुषं शास्ति शास्ता तेनानुशिष्टः प्रवणादिवांभो यथा
नियुक्तोऽस्मि तथा भवामि ८ भिनत्ति शिरसा शैलमहिं भोजयते च यः धीरेव कुरुते तस्य कार्याणामनुशासनं यो
बलादनुशास्तीह सोऽमित्रं तेन विंदति ९

एक इति प्रवणात् निम्नात् ८ भिनत्ति येन नियुक्तः स्वीयमपि शिरः स्ला[illegible]यतीत्यर्थः भोजयते णिच् श्वेति तङ् साक्षान्मत्सुमपि सर्पं स्पर्पः स्कन्दयतेऽत्यर्थ एष०
एवमनिषे पिकर्मणीयस एवमां प्रेरयतीत्यर्थः तेन शासनेन शास्य मेवामित्रं विंदति प्राप्नोति ९ ॥ ४ ॥ ४ ४ ॥ ४ ॥ ९६

समुपेक्षेत शासनमितिशेषः तत्पालकत्वेन तस्मिन्मित्रं मांत्वमेवं श्याधीत्यर्थः यदुक्तं वैराग्निं प्रशमयस्वेति तत्राह प्रदीप्येति प्रकर्षेणादीपनीयो ऽग्निर्यस्य स प्रदीप्ताग्निः कर्षः स्तं प्राक्पूर्वं प्रदीप्यैयः शाम विहंचिरं ना भिधावति स तस्य कर्षः स्य भस्मापि न विंदति तथा च एवं पांडवान्प्रकोप्यय दिस

मित्रतामनुयुक्तं तु समुपेक्षेत पंडितः प्रदीप्य प्राक्कुटीं प्राज्ञः प्रांशुरन्वा निधावति १० भस्मापि न स विंदेत शिष्टं क्वचन भारत
१० न वासयेत्पारवर्ग्यं द्विषं तं विशेषतः कुर्वाणं हि तमनुष्यं सपत्नेष्वपि विदुरस्तत्र गाश्चस्तु सांत्विताश्च सती स्त्रीजहाति ११
विदुर उवाच एतावता पुरुषं येत्यजंति तेषां सख्यमंतवद्भूहि राजन् राज्ञां हि चित्तानि परिप्लुतानि सांत्वे ध्वामुसले घातयं
ति अबालस्त्वं मन्यसे राजपुत्र बालोऽहमित्येवसंमेहत्तुद्धे १२

मूलान्नाशाया मित्ताहि एते मांनिर्मूलमुन्मूलयिष्यंतीति भावः अत्र पांगं तरं निमूलं १० पारवर्ग्यं परवर्गे शत्रुसंघेजातं ११ एतावतानीति शिष्टेणो न सांत्वितपुत्रेमयि वापच्छपातमकुर्वन् राजन्कृत्तराष्ट्र राज्ञां हीति परि प्लुतानि द्वेषेणेति शेषः तर्हि तेषां संहत्या घातयंति कोपप्रच्छादपंत्येव अयं तु कोपप्रकाशनान्नाजनीति विद्धिति भावः अबालत्वं पंडितत्वं आत्मन इति शेषः १२

स०

८७

बालो हं विदुर इति च मन्यसे तद्विपरीतमित्याह य इति सुहृत्सु अविश्वासं कुर्वन् बाल इत्यर्थः अबालस्त्वमिति पाठे त्वं बाल इति दुर्योधनेन काकूक्त्या योज्यं १३ ध्रुवं स्थिरं राज्यादिकं न रोचेत नरो च तेन यद्वा ध्रुवं निश्चितं हितोपदेशे इति शेषः भरतर्षभ प्रेतमुपहासे १५ पनु परुषाणि मा वोच इत्युक्तं तत्राह लभ्यन्त इति पथ्यं परिणामे हितं १६ १७ हे महाराज यत् असंतोनपिबंति तं सन्तो पेयं मन्युं देन्येक्रतो क्रुधीसुकं तच्च अव्याधिजं

यः सोऽहृदे पुरुषे स्थापयित्वा पश्चादेतं दूषयते स बालः न श्रेयसे नीयते मन्दबुद्धिः स्त्री श्रोत्रियस्येव गृहे प्रदुष्टा १३ ध्रुवं नरो चेद्भरतर्षभस्य पतिः कुमार्या इव षष्टिवर्षः अतः प्रियं चेदनुकांक्षसे त्वं सर्वेषु कार्येषु हिताहितेषु १४ स्त्रियश्च राजन् जडपंगुकांश्च पृच्छ त्वं वै तादृशांश्चैव सर्वान् १५ लभ्यते खलु पापीयान्नरः सुप्रियवागिह अप्रियस्य हि पथ्यस्य वक्ता श्रोता च दुर्लभः १६ यस्तु धर्मपरश्च स्यात् हित्वा भर्तुः प्रियाप्रिये अप्रियाण्याह पथ्यानि तेन राजा सहायवान् १७ अव्याधिजं कटुकं तीक्ष्णमुष्णं यशोमुषं परुषं पूतिगंधि सतां पेयं यन्न पिबंत्यसंतो मन्युं महाराज पिब प्रशाम्य १८

किं तु कटुजं रुष्यगानं दृष्यशोकदुरितिविरक्त तीक्ष्णां समेक्षित उष्णं तापजनकं यशोमुषं कीर्तिघ्नं परुषं रूक्षं निःस्नेहं पूतिगंधि पूतिदुष्टं न ऊर्ध्विरुष वर्तमानं औषधमप्येतादृशं अव्याधिजे जायते तत्र अव्याधिजं कटुजं कटुकादिक रुद्रूप्यांजं तीक्ष्णावेदनाकरं उष्णं जाड्यनाशकं यशोमुषं कामोद्दीपनेन परुषं घृतादिसाधनहीनं पूतिगंधिलशुनादिवद्दुर्गंधि पिब मन्युं औषधं वा गिलप्रशाम्य प्रशमं आरोग्यं च प्राप्नुहि॥ १८ ॥ ८७ ॥ ८७ ॥ भा० १

उद्यो०

८७

शासत निरंतरं १९ आशीविषान्दृष्टिविषान नेत्रविषान ध्वविशेषान शल्केणाक्रोधदृष्याच पांडवास्त्वां धक्ष्यंतीति भावः २० अध्यायः ६० पराजे

वैचित्रवीर्यस्य यशोधनं च वांछाम्यहं सह पुत्रस्य शाश्वत पश्यात यातेस्कन मस्मृते स्कमम मापिच स्वस्ति दिशंतु विप्राः १९ आशी
विषान्नेत्रविषान कोपयेन्नच पंडितः एवं तेहं वदामीदं प्रयतः कुरुनंदन २० इति सभापर्वणि द्यूते शकुनिरुवाच बहुवित्तं पराजे
षीः पांडवानां युधिष्ठिर आचक्ष्व वित्तं कौंतेय यदि तेस्त्यपराजितं १ युधिष्ठिर उवाच मम वित्तम संख्येयं यदहं वेद सौबल अथ त्वं
शकुने कस्माद्वित्तं समनुपृच्छसि २ अयुतं प्रयुतं चैव शंकुं पद्मं तथार्बुदं खर्वं चैव निखर्वं च समुद्रं चात्र पण्यतां एतन्मम धनं राजं
स्तेन दीव्याम्यहं त्वया ३ वैशंपायन उवाच एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत ४ यु
धिष्ठिर उवाच गवाश्वं बहुधेनूकम संख्येयम जाविकं यत्किंचिदनुपर्णाशां प्राक्सिंधोरपि सौबल एतन्मम धनं सर्वं तेन दीव्याम्यहं
त्वया ५ वैशंपायन उवाच एतच्छ्रुत्वा व्यवसितो निकृतिं समुपाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत ६ युधिष्ठिर उवा
च पुरं जनपदो भूमिरब्राह्मणधनैः सह अब्राह्मणाश्च पुरुषा राजन्शिष्टं धनं मम एतद्राजन ममधनं तेन दीव्याम्यहं त्वया ७

षीः हारितवान १२ संपरं साधिकं परार्द्धाद्य्यधिकं ३ ४ पर्णाशानदी ५ ६ ७ श्रीकृष्णायनमः ॥ ७ ॥ ७ ॥ ७ ॥ ॐ ॥

१३ अप्रियवत्तप्रियमपिघ्नतेत्यजामीत्यर्थः १४ १६ सुमनसांपरस्परमेकमत्यवतांभेदंवैमत्यं १७ ॥ ७ ॥

स०
९८

राजन् ५

वैशंपायनउवाच एतछ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत ८ युधिष्ठिरउवाच राज
पुत्राइमेराजनशोभंतेयैर्विभूषिताः कुंडलानिचनिष्काश्चसर्वंराजविभूषणं एतन्ममधनंराजनतेनदीव्याम्यहंत्वया ९ वै
शंपायनउवाच एतछ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत १० युधिष्ठिरउवाच
श्यामोयुवालोहिताक्षःसिंहस्कंधोमहाभुजः नकुलोग्लहएवैकोविद्ध्येतन्ममधनं ११ एवमुक्त्वातुतानहृष्टान्श
कुनिरुवाच प्रियस्तेनकुलोराजपुत्रोयुधिष्ठिर अस्माकंवशतांप्राप्तोभूयःकेनेहदीव्यसे १२ वैशंपायनउवाच ए
वमुक्त्वातुतानह्वान शकुनिःप्रत्यदीव्यत १ जितमित्येवशकुनिर्युधिष्ठिरमभाषत १३ युधिष्ठिरउवाच अयंधर्मा
न्सहदेवोनुशास्तिलोकेह्यस्मिन्पंडिताख्यांगतश्च अनर्हताराजपुत्रेणतेनदीव्याम्यहंचाप्रियवत्प्रियेण १४ वैशं
पायनउवाच एतछ्रुत्वाव्यवसितोनिकृतिंसमुपाश्रितः जितमित्येवशकुनिर्युधिष्ठिरमभाषत १५ शकुनिरुवाच मा
द्रीपुत्रौप्रियौराजंस्तवेमौविजितौमया गरीयांसौतुतेमन्येभीमसेनधनंजयौ १६ युधिष्ठिरउवाच अधर्मंचरसेनूनं राम०
९८
योनावेक्षसिवैनयं योनःसुमनसांमूढविभेदंकर्तुमिच्छसि १७

क१

मत्तः वित्तविवशचित्तत्वेनाधर्म्मेर्त्ता सगर्त्ते नरके स्थाणं स्थाणुत्वं ऋच्छति प्राप्नोति अर्छतीति पाठे आङ्पूर्वस्य रूपं ज्येष्ठो वयसाधिकः वरिष्ठो गुणैरधिकः १८ म

जेता२ रा२

शकुनिरुवाच गर्त्ते मत्तः प्रपतते प्रमत्तः स्थाणुमृच्छति श्रेष्ठो राजन्वरिष्ठोसि नमस्ते भरतर्षभ १८ स्वप्ने तानि न पश्यंति जाग्र
तो वा युधिष्ठिर कितवा यानि दीव्यंतः प्रलपंत्युत्कटा इव १९ युधिष्ठिर उवाच यो नः संख्ये नौरिव पारनेता रिपुगणां पुत्रस्त
रस्वी अनर्हता लोकवीरेणा तेन दीव्याम्यहं शकुने फाल्गुनेन २० वैशंपायन उवाच एतछ्रुत्वा व्यवसितो निकृतिं समुपा
श्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत २१ शकुनिरुवाच अयं मया पांडवानां धनुर्धरः पराजितः पांडवः सव्यसाची
भीमेन राजन्दयितेन दीव्य यत्कैतवं पांडव तेवशिष्टम् २२ युधिष्ठिर उवाच यो नो नेता यो युधां नः प्रणेता यथा वज्री दानवशत्रुरेकः तिर्यक्प्रेक्षी संहतभ्रूर्महात्मा सिंहस्कंधो यश्च सदात्यमर्षी २३ बलेन तुल्यो यस्य पुमान्न विद्यते गदाभृतामग्र इहारि
मर्दनः अनर्हता राजपुत्रेणा तेन दीव्याम्यहं भीमसेनेन राजन् २४ वैशंपायन उवाच एतछ्रुत्वा व्यवसितो निकृतिं समु
पाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत २५ शकुनिरुवाच बहु वित्तं पराजैषीर्भ्रातॄंश्च सहयद्विपान् आचक्ष्व
वित्तं कौंतेय यदि तेस्त्यपराजितं २६ युधिष्ठिर उवाच अहं विशिष्टः सर्वेषां भ्रातॄणां दयितस्तथा कुर्यामस्ते जितः कर्म्म स्वय
मात्मन्युपप्लुते २७ दे१

तत्वमेवाहस्व प्रहरति मत्तस्य मम वचः श्रोतव्यमितिभावः १९ संख्ये संग्रामे तरस्वी वेगवान् २० २१ कैतवं कितवेभ्यः आहर्त्तव्यं धनं २२ २६ उपप्लुते जिते २७ ॥७७॥

२८ पापिष्ठं अत्यधमं पापः पापहेतुः २९ ग्लहेपणविषये राजानं प्रति एवमुक्त्वा राज्ञां पांडवानां पराजयं च लोकवीरान्प्रति उक्त्वा शकुनिरुवावेति उत्तरेण संबंधः ३०
आत्मानं प्रति परां पुनर्जय दास्यात् मोचय नो चेत द्रौपदी वाऽस्मद्दासी भविष्यतीत्यर्थः ३१ रोहिणी नातिरिक्ता ३२ शारदोत्पलसेविन्याः लक्ष्म्याः रूपेण समा न

वैशंपायन उवाच एतत्कृत्वा व्यवसितो निकृतिं समुपाश्रितः जितमित्येव शकुनिर्युधिष्ठिरमभाषत २८ शकुनिरुवाच ए
तत्पापिष्ठमकरोर्यदात्मानं पराजयेः शिष्टे सति धने राजन् पाप आत्मपराजयः २९ वैशंपायन उवाच एवमुक्त्वा मताक्षस्ता
न्ग्लहे सर्वानवस्थितान् पराजयल्लोकवीरानक्षानुक्त्वा पृथक् पृथक् ३० शकुनिरुवाच अस्ति ते वै प्रिया राजन् ग्लह एको
ऽपराजितः पणस्व कृष्णां पांचालीं तयात्मानं पुनर्जय ३१ युधिष्ठिर उवाच नैव ह्रस्वा न महती नकृशा नातिरोहिणी नीलकुं
चितकेशी च तया दीव्याम्यहं त्वया ३२ शारदोत्पलपत्राक्ष्या शारदोत्पलगंधया शारदोत्पलसेविन्या रूपेण श्रीसमानया ३३
तथैव स्यादानृशंस्यात्तथा स्याद्रूपसंपदा तथा स्याच्छीलसंपत्त्या यामिच्छेत्पुरुषः स्त्रियं ३४ सर्वैर्गुणैर्हि संपन्नामनुकूलां प्रि
यंवदां यादृशीं धर्मकामार्थसिद्धिमिच्छेन्नरः स्त्रियं ३५

या सश्रियालावण्यसौभाग्यादिरूपया च समानया ३३ तथैवेति लक्ष्मीसाम्यमुच्यते ३४ धर्मकामार्थसिद्धिं धर्मकामस्येत्यर्थयोः सिद्धिर्यया सा तथा
तां अर्थमिति पाठे सिद्धिमिव सिद्धिं ३५

३६ मल्लिकेवसुरभिरितिशेषः संमोदोमल्लिकेचेवतिगौडपाठेसंमोदःपरिमलः वेदीवन्मध्यमध्या ३७ सुमध्यमासुंदरमध्यमा ३८ ३९ ४१ आकारहर्षेल
तत्वाभिप्रायएवं अभिधायअस्तिवैतेप्रियादेवीत्यादिकं उक्त्वा ४२ ४३ जितकाशीजयशोभी ४५ अध्यायः ऐहि वेश्मसंमार्जनां परैतु पारहृतासती

चरमंसंविशतियाप्रथमंप्रतिबुध्यते आगोपालाविपालेभ्यःसर्वंवेदकृताकृतं ३६ आभातिपद्मवद्वक्त्रंससेदंमल्लिकेवच वेदीम
ध्यादीर्घकेशीताम्रास्यानातिलोमशा ३७ तयैवंविधयाराजन्पांचाल्याहंसुमध्यया ग्लहंदीव्यामिचार्वंग्याद्रौपद्याहंतसौबल
३८ वैशंपायनउवाच एवमुक्तेतुवचनेधर्मराजेनधीमता धिग्धिगित्येववृद्धानांसभ्यानांनिसृतागिरः ३९ चुक्षुभेसासभाराज
नराज्ञांसंजज्ञिरेशुचः भीष्मद्रोणकृपादीनांस्वेदश्चसमजायत ४० शिरोगृहीत्वाविदुरोगतसत्वइवाभवत आस्तेध्यायन्नधोवक्त्रो
निश्वसन्निवपन्नगः ४१ धृतराष्ट्रस्तुसंहृष्टःपर्यपृच्छत्पुनःपुनः किंजितंकिंजितमितिह्याकारंनाभ्यरक्षत ४२ जहर्षकर्णोति
भृशंसहदुःशासनादिभिः इतरेषांतुसभ्यानांनेत्रेभ्यःप्रापतज्जलं ४३ सौबलस्त्वविचार्यैवजितकाशीमदोत्कटः जितमित्येवता
नक्षान्पुनरेवान्वपद्यत ४४ इतिसभापर्वणिद्यूते दुर्योधनउवाच एहिक्षत्तर्द्रौपदीमानयस्वप्रियांभार्यांसंमतांपांडवानां सं
मार्जतांवेश्मपरैतुशीघ्रंतत्रास्तुदासीभिरपुण्यशीला १ विदुरउवाच दुर्विभाषंभाषितंत्वादृशेननमंदसंबुध्यसिपाशबद्धः प्र
पातेत्वंलंबमानोनवेत्सिव्याघ्रान्मृगःकोपयसेतिबेलं २ आशीविषास्तेशिरसिपूर्णकोपामहाविषाः माकोपिष्ठाःसुमं
दात्मन्मागमस्त्वंयमक्षयं ३ नहिदासीत्वमापन्नाकृष्णाभवितुमर्हति अनीशेनहिराज्ञैषापणेन्यस्तेतिमेमतिः ४ अयं
धत्तेवेणुरिवात्मघातीफलंराजाधृतराष्ट्रस्यपुत्रः द्यूतंहिवैरायमहाभयायमत्तोनबुध्यत्ययमंतकाले ५ ॥ ६७ ॥ ॥

ऐतुआयातु १ दुर्विभाषंदुर्विकल्प्यं २ ४ वेणुःवेनापरनामराजा सहिऐश्वर्यंप्राप्य मान्यान् अमानयन्नसघोनष्टःएवमयमपीत्यर्थः ५ ॥ ६७॥

म०
१००

अरुंतुदः मर्मभेदी नृशंसवादी परुषवादी हीनतः नीचेन कर्मणा घृतादिना परं शत्रुं अभ्यादधीत वशे कुर्वीत उषंती दाहिकां रुषंतीमिति पाठे अकल्याणीं पापलोक्यां नरकावहां ६ ७ अजो हि शस्त्रमगिलत्किलैक इति इयं कथा वनेचर प्रसिद्धा एकः अजः शस्त्रं अगिलत गिलितुमारब्धः ततस्तद्दशा कुवन भूमौ आस्यं निपात्य पद्भ्यां भोक्तुमारब्धः ततस्तस्मिन्नुच्चलिते सति शिरसा सह तस्य कंठस्य निकृंतनं प्राप्य ममार तद्वत्त्वमपि पांडवैर्वैरशस्त्रेण स्वहननं मा कृथा इति मां च कश्चित्किलमत्स्यघाती बडिशं धान्यपिष्टेनोपलिप्य यावज्जलाशये पातयति तावत्कश्छागेनचापलात्तत्सपिष्टमेव गिलितं तन्निष्काश

नारुंतुदः स्यान्न नृशंसवादी न हीनतः परमभ्याददीत ययास्य वाचा पर उद्विजेत न तां वदेद्रुषतीं पापलोक्यां ६ समुच्चरंत्यति वादाश्च वक्त्राद्यैराहतः शोचति रात्र्यहानि परस्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेषु ७ अजो हि शस्त्रमगिलत्किलैकः शस्त्रे विपन्ने शिरसास्य भूमौ निकृंतनं स्वस्य कंठस्य घोरं तद्वद्वैरं मा कृथाः पांडुपुत्रैः ८ ॥ ७ ॥ ७ ॥ ॥

नेविदीर्णकंठ पृच्छागोममार स्याख्यापिकात्र दृष्टांतार्थमुक्ता पदयोजना तु एकः अजः घोरं शस्त्रं बडिशं अगिलत गिलितवान् कुतोस्य घोरत्वं तत्राह अस्य अजस्य शिरसा सह भूमौ शस्त्रे विपन्ने विशेषेण प्राप्ते सति स्वस्य कंठस्य निकृंतनं कर्त्तनं छेदहेतुः यतो ऽभवदित्यन्वयः अजकंठस्थं शस्त्रं सूत्रेण लग्नमाणां तच्छि रसा सेवतदेहाद्विभक्तमभूदित्यर्थः पद्भिरपास्य भूमिमिति पाठे तु शस्त्रे विपन्ने पद्भिर्भूमिमपास्य कंठस्य कृंतनं छेदं आपेत्य ध्यात् इत्ययोज्यं अयं भावः य एम०
स्तु कंठान्निष्काशयमाणो बडिशोपस्तुरेव अंतरिक्षस्थो ऽभवन्न तु ततो बडिशं विप्रुज्यते तस्य पशोर्मरणातिश्चयात्स्तु बडिशार्थी तस्य कंठछेदवानिति एवं बडि १००
शस्थानीयां द्रोपदीस्य शानच्छागइव त्वमपि नश्यसीति भावः ८

पार्थाः नकिंचिद्वदंतीत्यन्वयःणास्तुनकिंचिद्वदंतीत्यन्यत्दुर्वाक्यादितिशेषः वनेचरंवानप्रस्थंभषंतिहेश्वखनराःश्वनकतुल्याःनराः आपत्सुधीरानुद्दिश्यभषंति धीराःस्तुधीरत्वादेवतन्नगण्यंतीत्यपिपांडवान्प्रत्या पयतीतिध्वनिः ९ द्यूतोदयेद्यूतलक्षितेउत्कर्षे १० अलाबुमज्जनादिवत्हितमप्यहितवद्दुष्टानांभातीत्या

सं२

नकिंचिदिष्टंप्रवदंतिपार्थावनेचरंवागृहमेधिनंवा तपस्विनंवापरिपूर्णविद्यंभषंतिह्येवंश्वनराःसदैव ९ द्वारंसुघोरंनरकस्यजिह्मंनबुध्यतेधृतराष्ट्रस्यपुत्रः तमन्वेतारोबहवःकुरूणांद्यूतोदयेसहदुःशासनेन १० मज्जंत्यलाबूनिशिलाःप्लवंतेमुह्यंतिनावोंभसिशश्वदेव मूढोराजाधृतराष्ट्रस्यपुत्रोनमेवाचःपथ्यरूपाःशृणोति ११ अंतोनूनंभवितायंकुरूणांसुदारुणःसर्वहरोविनाशः वाचःकाव्याःसुहृदांपथ्यरूपानश्रूयंतेवर्द्धतेलोभएव १२ इतिसभापर्वणि वैशंपायनउवाच धिगस्तुक्षत्तारमिति ब्रुवाणोदर्पेणमत्तोधृतराष्ट्रस्यपुत्रः अवैक्षतप्रातिकामिंसभायामुवाचचैनंपरमार्यमध्ये १ ॥ ७ ॥ ७ ॥

शयः ११ अंतोनाशकरः १२ अध्यायः धिगस्तु अधिब्रुवाणाइतिपाठेइतिशब्दाध्याहारःअधिकमधिकंनिर्भर्त्स्यदंब्रुवाणाइत्यर्थः प्रातिकामीशब्दईकारांतइन्नंतश्च १

विवदतिविपरीतंवदति २ सिंहगोष्ठंसिंहस्थानं ३ ४ कैतवंकितवेभ्योदेयंधनं ५ १३ लघीयाननीचः १४

स० १०१

दुर्योधनउवाच त्वंप्रातिकामिन्द्रौपदीमानयस्वनतेभयंविद्यतेपांडवेभ्यः क्षत्ताह्ययंविवदत्येवभीतोनचास्माकंवृद्धिकामःसदैव
२ वैशंपायनउवाच एवमुक्तःप्रातिकामीससूतःप्रायाच्छीघ्रंराजवचोनिशम्य प्रविश्यचश्वेवसिंहस्यगोष्ठंसमासदन्महिषींपांड
वानां ३ प्रातिकाम्युवाच युधिष्ठिरोद्यूतमदेनमत्तोदुर्योधनोद्रौपदित्वामजैषीत् सात्वंप्रपद्यस्वधृतराष्ट्रस्यवेश्मनयामित्वांकर्मणेयाज्ञ
सेनि ४ द्रौपद्युवाच कथंत्वेवंवदसिप्रातिकामिन्कोहिदीव्येतभार्ययाराजपुत्रः मूढोराजाद्यूतमदेनमत्तोह्यभून्नान्यत्कैतवम
स्यकिंचित् ५ प्रातिकाम्युवाच यदानाभूत्कैतवमन्यदस्यतदादेवीत्पांडवोजातशत्रुः न्यस्ताःपूर्वंभ्रातरस्तेनराज्ञास्वयंचात्मा
त्वमथोराजपुत्रि ६ द्रौपद्युवाच गच्छत्वंकितवंगत्वासभायांपृच्छसूतज किंनुपूर्वंपराजैषीरात्मानमथवानुमां ७ एतज्ज्ञा
त्वासमागच्छततोमांनयसूतज ज्ञात्वाचिकीर्षितमहंराज्ञोयास्यामिदुःखिता ८ वैशंपायनउवाच सभांगत्वासचोवाचद्रौपद्या
स्तद्वचस्तदा युधिष्ठिरंनरेंद्राणांमध्येस्थितमिदंवचः ९ कस्येशोनःपराजैष्ठाइतित्वामाहद्रौपदी किंनुपूर्वंपराजैषीरात्मा
नमथवापिमां १० युधिष्ठिरस्तुनिश्चेतागतसत्त्वइवाभवत् नतंसूतंप्रत्युवाचवचनंसाध्वसाधुवा ११ दुर्योधनउवाच
इहैवागत्यपांचालीप्रश्नमेनंप्रभाषतां इहैवसर्वेशृण्वंतुतस्याश्चैतस्यपद्वचः १२ वैशंपायनउवाच सगत्वाराजभवनं
दुर्योधनवशानुगः उवाचद्रौपदींसूतःप्रातिकामीव्यथन्निव १३ प्रातिकाम्युवाच सभ्यास्त्वमीराजपुत्र्याह्वयंतिमन्येप्रा स्म० १०१
प्तःसंशयःकौरवाणां नवैसमृद्धिंपालयतेलघीयान्यत्त्वांसमानेष्यतिराजपुत्रि १४ ॥ ७ ॥

बा३

संविधाता ईश्वरः स्पर्शौ सुखदुःखे वृद्धबालो पंडितमूर्खौ स्पृशतः धास्यतः शमं स्वास्थ्यं धास्यति करिष्यति गोप्यमानः रक्ष्यमाणः १५ २३ मानं दुर्योधनस्याज्ञाभंगेन न

द्रौपद्युवाच एवं नूनं व्यदधात्संविधातास्पर्शावुभौस्पृशतोवृद्धबालौ धर्मंत्वेकं परमंप्राहलोकेसनःशमंधास्यतिगोप्यमानः १५
सोयंधर्मोमात्यगात्कौरवान्वैसभ्यान्गत्वापृच्छधर्म्यंवचोमे तेमांब्रूयुर्निश्चितंतत्करिष्येधर्मात्मानोनीतिमंतोवरिष्ठाः १६ श्रुत्वासूतस्त
द्वचोयाज्ञसेन्याःसभांगत्वाप्राहवाक्यंतदानीं अधोमुखास्तेनचकिंचिदूचुर्निर्बंधंतंधार्तराष्ट्रस्यबुद्ध्वा १७ वैशंपायनउवाच युधिष्ठि
रस्तुतच्छ्रुत्वादुर्योधनचिकीर्षितं द्रौपद्याःसंमतंदूतंप्राहिणोद्भरतर्षभ १८ एकवस्त्राअधोनीवीरोदमानारजस्वला सभामागम्यपां
चालिश्वशुरस्याग्रतोभवत् १९ अथतामागतांदृष्ट्वाराजपुत्रींसभासदः सभ्याःसर्वेविनिंदंतोमनोभिर्धृतराष्ट्रजं २० सगत्वात्वरितं
दूतःकृष्णायाभवनंनृप न्यवेदयन्मतंधीमानधर्मराजस्यनिश्चितं २१ पांडवाश्चमहात्मानोदीनादुःखसमन्विताः सत्येनातिपरीतां
गानोदीक्षंतेस्मकिंचन २२ ततस्त्वेषांमुखमालोक्यराजादुर्योधनःसूतमुवाचहृष्टः इहैवैतामानयप्रातिकामिन्प्रत्यक्षमस्याःकु
रवोब्रुवंतु २३ ततःसूतस्तस्यवशानुगामीभीतश्चकोपाद्द्रुपदात्मजायाः विहायमानंपुनरेवसभ्यानुवाचकृष्णांकिमहंब्रवीमि
२४ दुर्योधनउवाच दुःशासनैषममसूतपुत्रोवृकोदरादुद्विजतेल्पचेता स्वयंप्रगृह्यानययाज्ञसेनींकिंतेकरिष्यंत्यवशाःसप
त्नाः २५ ततःसमुत्थायसराजपुत्रःश्रुत्वाभ्रातुःशासनंरक्तदृष्टिः प्रविश्यतद्वेश्ममहारथानामित्यब्रवीद्द्रौपदींराजपुत्रीं २६
एह्येहिपांचालिजितासिकृष्णेदुर्योधनंपश्यविमुक्तलज्जा कुरून्भजस्वायतपद्मनेत्रेधर्मेणलब्धासिसभांपरैहि २७ ॥

सपत्नेषत्वंविहायपतिरस्कृत्यउद्विजतेबिभेति अवशाःअस्मद्दासत्वात २५ २६ परैहिधिक्कृतासतीएहि २७ ॥ ७ ॥ ७ ॥

२८ कर्मिमन्तस्त्वेणीन्रूपेणासंनिवेशितनपाचप्रवहन्त्वदीजलवन्निम्नोन्नतेषु कर्मयः वेणवलंकारास्तद्वत्स २९ ३२ कृष्ण जिष्णुहरिर्नरो नारायणानराविन्पर्थः ३३ यथोपजोषं यथारुचि ३४ ३५ उपनीतशास्त्राः अध्यापितशास्त्रा गुरुतुल्यस्थानाः पित्रादितुल्याः एवं एकवस्त्रत्वेन ३६ ३७ नि

स॰ १०२ ततः समुत्थाय स दुर्मनाः सा विवर्णमामज्यमुखं करेण आर्त्ता प्रदुद्राव यतः स्त्रियस्ता वृद्धस्य राज्ञः कुरुपुंगवस्य २८ ततो जवेनाभिससार रोषात् दुःशासनस्तामभिगर्ज्जमानः दीर्घेषु नीलेष्वथ चोर्मिमत्सु जग्राह केशेषु नरेन्द्रपत्नीं २९ ये राजसूयावभृथे जलेन महाक्रतौ मंत्रपूतेन सिक्ताः ते पांडवानां परिभूय वीर्यं बलात् प्रमृष्टा धृतराष्ट्रजेन ३० स तां पराकृष्य सभासमीपमानीय कृष्णामतिदीर्घकेशीं दुःशासनो नाथवतीमनाथवच्चकर्ष वायुः कदलीमिवार्त्तां ३१ सा कृष्यमाणा नमितांगयष्टिः शनैरुवाचाथ रजस्वलास्मि एकं च वासो मम मंदबुद्धे सभां नेतुं नार्हसि मामनार्य्य ३२ ततोऽब्रवीत्तां प्रसभं निगृह्य केशेषु कृष्णेषु तदा स कृष्णां कृष्णं च जिष्णुं च हरिं नरं च त्राणाय विक्रोश नियाज्ञसेनी ३३ दुःशासन उवाच रजस्वला वा भव याज्ञसेनि एकांबरा वाप्यथवा विवस्त्रा द्यूते जिता चासि कृतासि दासी

दासी सिदासीषु वासश्च यथोपजोषं ३४ वैशंपायन उवाच प्रकीर्णकेशी पतितार्द्धवस्त्रा दुःशासनेन व्यवधूयमाना ह्रीमत्यमर्षेण च दह्यमाना शनैरिदं वाक्यमुवाच कृष्णा ३५ द्रौपद्युवाच इमे सभायामुपदिष्टशास्त्राः क्रियावंतः सर्व एवेंद्रकल्पाः गुरुस्थाना गुरवश्चैव सर्वे तेषामग्रे नोत्सहे स्थातुमेवं ३६ नृशंसकर्मंस्त्वमनार्य्यवृत्त मा मां विवस्त्रां कुरु मा विकीर्षीः न मर्षयेयुस्तव राजपुत्राः सेन्द्रापि देवा यदि ते सहायाः ३७ धर्मे स्थितो धर्मसुतो महात्मा धर्मश्च सूक्ष्मो निपुणोपलभ्यः वाचापि भर्त्तुः परमाणुमात्रमिच्छामि दोषं न गुणान्विसृज्य ३८ इदं त्वकार्यं कुरुवीरमध्ये रजस्वलां यत्परिकर्षसे मां न चापि कश्चित्कुरुतेत्र लज्जां ध्रुवं तवेदं मतमन्वपद्यत ३९ धिगस्तु नष्टः खलु भारतानां धर्मस्तथा क्षत्रविदां च वृत्तं यत्राभ्यतीतां कुरुधर्मवेलां प्रेक्षंति सर्वे कुरवः सभायां ४० द्रोणस्य भीष्मस्य च नास्ति सत्वं ध्रुवं तथैवास्य महात्मनोपि राज्ञस्तथा हीममधर्ममुग्रं न लक्षयंते कुरुवृद्धमुख्याः ४१ ॥ ७ ॥ ७ ॥ ७ ॥ मिथ्या सभाप॰ टी॰ ६४ सभा॰ १०२

पुणोपलभ्यः सूक्ष्मबुद्धिमद्भिरेव ज्ञेयं वाचेति नाहममपराधिनां भार्यास्मीति भावः ३८ कश्चिदपि तत्कुत्सां न कुरुते किंतु सर्वोपि जनस्त्वदीयमतमनुपेतः ३९ ४० अ

नं ५

आधूय आकंप्य भर्त्तुर्वशतां दासःभार्यापि दास्येवेतिभावः ४४ ४७ जितोस्मीतिवदताऽऽत्मैव पराजितो नतु स्त्री ४८ नच राजजयेनैव त्वज्जयः सिध्यति द्यूतमर्यादा
विदा शकुनिनैव तत्र पृथक् पणीकरणात् इत्याह द्यूते इति राजा तु पराहृतया त्वां पणीकृतवान् न स्वच्छया ततोऽस्वामी कथं पणितवानिति राज्ञो विदोषो नास्ति तथाच शकु

भ २

वैशंपायनउवाच तथाब्रुवंतीं करुणां सुमध्यमा भर्तॄन्कटाक्षैः कुपितानपश्यत सापांडवान्कोपपरीतदेहान्संदीपयामास कटाक्षपातैः
४२ हृतेन राज्येन तथा धनेन रत्नैश्च मुख्यैर्न तथा बभूव यथा त्रपाकोपसमीरितेन कृष्णाकटाक्षेण बभूव दुःखं ४३ दुःशासनश्चापि समी
क्ष्य कृष्णामवेक्षमाणां कृपणान्पतींस्तान् विधूय वेगेन विकल्पसंज्ञामुवाच दासीति हसन्सशब्दं ४४ कर्णस्तु तद्वाक्यमतीव हृष्टः संपूजया
मास हसन्सशब्दं गांधारराजः सुबलस्य पुत्रस्तथैव दुःशासनमभ्यनंदत ४५ सभ्यास्तु ये तत्र बभूवुरन्ये ताभ्यामृते धार्तराष्ट्रेण चैव तेषा
मभूद्दुःखमतीव कृष्णां दृष्ट्वा सभायां परिकृष्यमाणां ४६ भीष्मउवाच न धर्मसौक्ष्म्यात्सुभगे विवेक्तुं शक्नोमि ते प्रश्नमिमं यथावत
अस्वो ह्यशक्तः पणितुं परस्वं स्त्रियश्च भर्तुर्वशतां समीक्ष्य ४७ त्यजेत सर्वां पृथिवीं समृद्धां युधिष्ठिरो धर्ममथो न जह्यात उक्तं जितोस्मी
ति च पांडवेन तस्मान्न शक्नोमि विवेक्तुमेतत ४८ द्यूतेऽद्वितीयः शकुनिर्नरेषु कुंतीसुतस्तेन निसृष्टकामः न मन्यते तां निकृतिं युधिष्ठिरः त
स्मान्न ते प्रश्नमिमं ब्रवीमि ४९

निबुद्धे द्यूतमजिता तच्च शकुनिर्नेमन्यते इत्याह नेति यतः पणीकृता अतः प्रागजिता यतश्च परदासेन पणीकृता ततोऽप्यजितैवेति भावः ४९ ॥ छ ॥ छ ॥

नातिकृतप्रपत्नोऽनभ्यस्तद्यूतः राजामां सभायामाहूय कथं निसृष्टकामः अनीशोपि सन्मदाक्षानेन शाठ्येन सकामा कथं कृतवानित्यर्थः ५० जितोपीति अनात्मपराजया

स० १०३ वसानत्वा द्यूतस्य कथं ततोप्युपरि देवितवानित्यर्थः ५१ विब्रूत विस्पष्टं ब्रूत ननु भीष्मवत्संदिग्धमिति भावः ५२ तथेति भीष्मेण द्रौपदीमाहात्म्यख्यापनाय प्रश्नस्यो

द्रौपद्युवाच आहूय राजा कुशलैरनार्यैर्दुष्टात्मभिर्नैकृतिकैः सभायां द्यूतप्रियैर्नातिकृतप्रयत्नः कस्मादयं नाम निसृष्टकामः ५० अशु
द्धभावैर्निकृतिप्रवृत्तैरबुध्यमानः कुरुपांडवाग्र्यः संभूय सर्वैश्च जितोपि यस्मात्पश्चादयं कैतवमभ्युपेयः ५१ तिष्ठंति चेमे कुरवः सभायामीशाः सु
तानां च तथा स्नुषाणां समीक्ष्य सर्वे मम चापि वाक्यं विब्रूत मे प्रश्नमिदं यथावत् ५२ वैशंपायन उवाच तथा ब्रुवंतीं करुणं रुदंतीमवेक्ष्यमा
णां कृपणान्पतींस्तान् दुःशासनः परुषाण्यप्रियाणि वाक्यान्युवाचामधुराणि चैव ५३ तां कृष्यमाणां च रजस्वलां च स्रस्तोत्तरीयामतदर्हमा
णां वृकोदरः प्रेक्ष्य युधिष्ठिरं च चकार कोपं परमार्तरूपः ५४ इति सभापर्वणि द्यूते भीम उवाच भवंति गेहे बंधकाः कितवानां युधिष्ठिर न
ताभिस्तत्र दीव्यंति दया चैवास्ति तास्वपि १ काश्यो यदुनमाहार्षीद्द्रव्यं यच्चान्यदुत्तमं तथान्ये पृथिवीपाला यानि रत्नान्युपाहरन् २ वाहनानि
धनं चैव कवचान्यायुधानि च राज्यमात्मा वयं चैव कैतवेन हृतं परैः ३ ॥ ६ ॥ ६ ॥

नरं नोक्तं दुःशासनस्तु पांडवपक्षपाती नापि भीष्मेण संशयोपन्यासादस्माकमेव जय इति मत्वा नो यत्किंचित्प्रलापेत्यर्थः ५३ परं अस्वस्थं ५४ अध्यायः भवं सभा० १०३
ति ३

तेतवपुरइतिशेषःसंप्रधक्ष्यामि ६ ८ परकामेनपरेच्छया ९ एवमितिएवंत्वदुक्तप्रकारेणअस्मिन्प्रकृतेविषयेकृतंकुशलंधर्मपालनाख्यंयदिनविद्यांनजानी

नं ३

नचमेतत्रकोपोभूत्सर्वस्येशोहिनोभवान इमंत्वतिक्रमंमन्येद्रौपदीयत्रपण्यते ४ एषाह्यनर्हतीबालापांडवान्प्राप्यकौरवैः त्वत्कृ
तेक्लिश्यतेक्षुद्रैर्नृशंसैरकृतात्मभिः ५ अस्याःकृतेमन्युरयंत्वयिराजन्निपात्यते बाहूतेसंप्रधक्ष्यामिसहदेवाग्निमानय ६ अर्जुन
उवाच नपुराभीमसेनत्वमीदृशीर्वदितागिरः परैस्तेनाशितंनूनंनृशंसैर्धर्मगौरवं ७ नसकामाःपरेकार्याधर्ममेवाचरोत्तम भ्रा
तरंधार्मिकंज्येष्ठंकोतिवर्तितुमर्हति ८ आहूतोहिपरैराजाक्षात्रव्रतमनुस्मरन दीव्यतेपरकामेनतन्नःकीर्त्तिकरंमहत ९
भीमसेनउवाच एवमस्मिन्कृतेविद्यांयदिनाहंधनंजय दीप्तेग्नौसहितौबाहूनिर्दहेयंबलादिव १० वैशंपायनउवाच तथा
तान्दुःखितान्दृष्ट्वापांडवान्धृतराष्ट्रजः क्लिश्यमानांचपांचालींविकर्णइदमब्रवीत ११ याज्ञसेन्यायदुक्तंतद्वाक्यंविब्रूतपा
र्थिवाः अविवेकेनवाक्यस्यनरकःसद्यएवनः १२ भीष्मश्चधृतराष्ट्रश्चकुरुवृद्धतमावुभौ समेत्यनाहतुःकिंचिद्विदुरश्चमहामतिः
१३ भारद्वाजश्चसर्वेषामाचार्यःकृपएवच कुतएतावपिप्रश्नंनाहतुर्द्विजसत्तमौ १४ येत्वन्येपृथिवीपालाःसमेताःसर्वतोदिशः
कामक्रोधौसमुत्सृज्यतेब्रुवंतुयथामति १५ यदिदंद्रौपदीवाक्यमुक्तवत्यसकृच्छुभा विमृश्यकस्यकःपक्षःपार्थिवावदतोत्त
रं १६ एवंसबहुशःसर्वानुक्तवांस्तान्सभासदः नचतेपृथिवीपालास्तमूचुःसाध्वसाधुवा १७ ॥ छ ॥

यांतर्हिबाहूदहेयमेव यत्नोजानामिअतोनदहामीत्यर्थः १० १४ सर्वतोदिशःसर्वदेशीयाः १५ १६ १७ ॥ छ ॥ छ ॥ छ ॥

१९ महीक्षितां राज्ञां ग्राम्ये स्त्रीभोगे २० तथेति कृतान्यव्कृतैवसाक्रियेत्यर्थः २१ समाहूतेन प्रेरितेन २२ सर्वेषां भार्याकथमेकेन पणीकर्त्तुं शक्येत्यारुसाधा
मं१

स० १०५ उक्त्वा सकृन्तथा सर्वान्विकर्णः पृथिवीपतीन पाणीपाणिं विनिष्पिष्य निश्वसन्निदमब्रवीत १८ विब्रूत पृथिवीपाला वाक्यं मा कथं
चन मन्ये न्याय्यं यदत्राहं तद्धि वक्ष्यामि कौरवाः १९ चत्वार्याहु र्नरश्रेष्ठा व्यसनानि महीभृतां मृगयां पानमक्षांश्च ग्राम्ये चैवातिर
क्ततां २० एतेषु हि नरः सक्तो धर्ममुत्सृज्य वर्तते तथायुक्तेन च कृतां क्रियां लोको न मन्यते २१ तदयं पांडुपुत्रेण व्यसने वर्तता भृ
शं समाहूतेन कितवैरास्थितो द्रौपदीपणः २२ साधारणी च सर्वेषां पांडवानामनिंदिता जितेन पूर्वं चानेन पांडवेन कृतः पणः २३
इयं च कीर्तिता कृष्णा सौबलेन पणार्थिना एतत्सर्वं विचार्याहं मन्ये न विजितामिमां २४ एतच्छ्रुत्वा महान्नादः सभ्यानामुदतिष्ठ
त विकर्णं शंसमानानां सौबलं चापि निंदतां २५ तस्मिन्नुपरते शब्दे राधेयः क्रोधमूर्छितः प्रगृह्य रुचिरं बाहुमिदं वचनमब्रवीत
२६ कर्ण उवाच दृश्यंते वै विकर्णे हि वैकृतानि बहून्यपि तज्जातस्तद्विनाशाय यथाग्निररणीप्रजः २७ एते न किंचिदप्याहुश्चो
दिता ह्यपि कृष्णया धर्मेण विजितां मन्ये मन्यंते द्रुपदात्मजां २८ त्वं तु केवलबाल्येन धार्तराष्ट्र विदीर्यसे यद्ब्रवीषि सभामध्ये बाल
स्थविरभाषितं २९ न च धर्मं यथावत्त्वं वेत्सि दुर्योधनावर यद्ब्रवीषि जितां कृष्णां न जितेति सुमंदधीः ३० कथं ह्यविजितां
कृष्णां मन्यसे धृतराष्ट्रज यदा सभायां सर्वस्वं न्यस्तवान्पांडवाग्रजः ३१ अभ्यंतरा च सर्वस्वे द्रौपदी भरतर्षभ एवं धर्मजितां कृष्णां
मन्यसे न जितां कथं ३२ सभा० १०५

रणीति २३ एतत्सर्वं राज्ञो व्यसनित्वं जितत्वं परप्रवर्तितत्वं द्रौपद्याः साधारणत्वं चेति हेतुचतुष्कं २४ २६ वैकृतानि विपरीतानि २७ २८ तान्येवाहयदि
ति २९ ३० ३१ ३२

वस्त्रसंहर्ता १

२७ प्रावारिकः प्राहमानी ३८ अवकीर्य समंततस्त्यक्त्वा ३९ ४० आकृष्यमाण इति हरिः सर्वदुःखसंहर्ता वा गोविंद गवां इंद्रियाणां विंदतीति विंदोल
ब्धा सर्वेंद्रियचालकत्वात्सन्निहितः मां कथं न जानासि सन्निहितोप्यशक्तः किं कुर्यादित आह द्वारकावासिन्निति एकसत्रेणो बलीयान् आपदः सकाशात् दुःखं तुं समु
द्रमध्ये तां पुरीं प्रति सर्वनगरस्य युगपत्स्नापनं चकुर्वतस्तव मम त्राणामीषत्करमित्यर्थः ननु सन्निहितः शक्तश्च किमिति दुष्टान्न तु न हंसीत्याह आह कृष्ण स्मरस्तमा
वास १

कीर्त्तिता द्रौपदी वाचा अनुज्ञाताच पांडवैः भवत्य विजिता केन हेतुनैषां मता तव ३३ मत्यसे भामे ताम्रानीता भेकवाससां अध
र्मेणेति न आपि अप्र एव भेवा कासमुत्तमे ३४ एको भर्त्ता स्त्रिया देवैर्विहितः कुरुनंदन इयं त्वनेकवशगा बंधकीति विनिश्चिता ३५ अस्याः
सभामानयनं न चित्रमिति मे मतिः एकांबरधरत्वं वाप्यथवापि विवस्त्रतां ३६ यच्चैषां द्रविणं किंचित्याचैषा येच पाण्डवाः सौबलेने
हतत्सर्व्वंधर्म्मेणाविजितं वसु ३७ दुःशासनसुबालोयं विकर्णः प्राज्ञवादिकः पांडवानां च वासांसि द्रौपद्याश्चाप्युपाहर ३८ तच्छ्रु
त्वा पांडवाः सर्वे स्वानि वासांसि भारत अवकीर्य्योत्तरीयाणि सभायां समुपाविशत ३९ ततो दुःशासनो राजन्द्रौपद्या वसनं बलात
सभामध्ये समाक्षिप्य व्यपाकर्षुं प्रचक्रमे ४० वैशंपायन उवाच आकृष्यमाणे वसने द्रौपद्या चिंतितो हरिः गोविंद द्वारकावासिन् कृष्ण
गोपीजनप्रिय ४१

अएव सर्वदोषकर्षणान्ननु तथापि अनंतं साहसं मायामूर्खत्वमतिलोभता अशौचं निर्दयत्वंच स्त्रीणां दोषाः स्वभावजा इत्युक्तेः स्वाभाविकस्त्रीदोषेणापने
तुं शक्तः न ह्याशीविषदंष्ट्रा अमृतस्रवा कर्त्तुं शक्येत्यत आह गोपीजनप्रिय नरेषु तावदयं तं नीचान्पोनन्ति स्त्रियस्तत्रतोपि नीचतरास्तास्त्वपि तवानुग्रहो दृ
श्यते किमुत मादृश्यां त्वदेकशरणायां त्वयैव राजसूयाभिषेकेणानुगृहीतायामिति भावः ४१ ॥ छ ॥ छ ॥ छ ॥ छ ॥

केशव कश्चअश्वईशश्चब्रह्मविष्णुरुद्राः तैःसहवर्त्तते इति केशवब्रह्मादीनामपिप्रवर्त्तकतत्कालकेति अतःसर्वथात्वंमामनुगृह्णीष्वेतिभावः आर्त्तिनाश
नेतिगोवर्द्धनोद्धरणादौव्रजपानादिनाव्रजवासिनामार्त्तिस्त्वयैवयथानाशितातथाममाप्यार्त्तिंनाशयेतिभावः ४२ विश्वात्मन विश्वांतर्यामिन्नित्यर्थः विश्व
स० १०५ भावन विश्वकर्त्तः अंतर्यामित्वेनशत्रुत्वादस्मिन्नर्थेऽसमर्थीनं कुरु अथवा विश्वकर्तृत्वेनवस्त्राणिबहूनिसमर्पयेतिभावः ४३ भामिनी दीप्तिमती स्वस्मि

कौरवैःपरिभूतांमांकिंनजानासिकेशव हेनाथहेरमानाथव्रजनाथार्त्तिनाशन ४२ कौरवार्णवमग्नांमामुद्धरस्वजनार्दन कृष्ण
कृष्णमहायोगिन्विश्वात्मन्विश्वभावन प्रपन्नांपाहिगोविंदकुरुमध्येवसीदतीं ४३ इत्यनुस्मृत्यकृष्णंसाहरिंत्रिभुवनेश्वरं प्रारु
दद्दुःखिताराजन्मुखमाछाद्यभामिनी ४४ याज्ञसेन्यावचःश्रुत्वाकृष्णोगह्वरितोऽभवत् त्यक्त्वाशय्यासनंपद्भ्यांकृपालुःकृपयाभ्यगात्
४५ कृष्णंचविष्णुंचहरिंनरंचत्राणायविक्रोशतियाज्ञसेनी ततस्तुधर्म्मोऽन्तरितोमहात्मासमावृणोद्वैविविधैःसुवस्त्रैः ४६ आकृ
ष्यमाणेवसनेद्रौपद्यास्तुविशांपते तद्रूपमपरंवस्त्रंप्रादुरासीदनेकशः ४७ नानारागविरागाणिवसनान्यथवैप्रभो प्रादुर्भ
वंतिशतशोधर्मस्यपरिपालनात् ४८ ततोहलहलाशब्दस्तत्रासीद्घोरदर्शनः तदद्भुततमंलोकेवीक्ष्यसर्वेमहीभृतः शशंसु
द्रौपदींतत्रकुत्संतोधृतराष्ट्रजं ४९

न्भगवदनुग्रहनिश्चयात्शत्रुजनगणयंतीत्यर्थः ४४ गह्वरितःकरुणातिशयाद्रुद्धकंठः ४५ धर्म्मोऽन्तरितःधर्म्मएवअंतर्वस्त्रंतदभावंगतवान्गतोवाचतांव स०प० १०५
स्त्ररूपैःसमावृणोच्च ४६ विशांपते ४७ नानारागाणिचविरागाणिकेवलश्वेतानिच ४८ नास्त्यकार्यंकदर्याणांनास्त्यसाध्यंमहात्मनां नास्त्युपेक्ष्योहरेर्भक्तइति
धृतेप्रदर्शितं ४९

शशापशपथंकृतवान ५० ५६ धर्मपीडामेवाहसभ्यामिति आर्तस्यात्राणेनसभ्यानांधर्मनाशोस्त्येव यथोक्तंतसभांप्रविवेशेत्यादिनाःसभ्यदोषाननुस्मरन् अब्रुवनविब्रु

शशापतत्रभीमस्तुराजमध्येबृहत्स्वनः क्रोधाद्विस्फुरमाणोष्ठोविनिष्पिष्यकरेकरं ५० भीमउवाच इदंमेवाक्यमादध्वंक्षत्रिया
लोकवासिनः नोक्तपूर्वंनरैरन्यैर्नचान्योयद्वदिष्यति ५१ यद्येतदेवमुक्त्वाहंनकुर्यांपृथिवीश्वराः पितामहानांपूर्वेषांनाहंगतिमवा
प्नुयाम ५२ अस्यपापस्यदुर्बुद्धेर्भारतापसदस्यच नपिबेयंबलाद्वक्षोभित्वाचेद्रुधिरंयुधि ५३ वैशंपायनउवाच तस्यतेतद्वचःश्रुत्वा
रौद्रंलोमप्रहर्षणं प्रचक्रुर्बहुलांपूजांकुत्संतोधृतराष्ट्रजं ५४ यदातुवाससांराशिःसभामध्येसमाचितः ततोदुःशासनःश्रांतोव्रीडि
तःसमुपाविशत ५५ धिक्शब्दस्तुततस्तत्रसमभूल्लोमहर्षणः सभ्यानांनरदेवानां [illegible] दृष्ट्वाकुंतीसुतांस्तथा ५६ नविब्रुवंतिकौ
रव्याःप्रश्नमेतमितिस्मह सुजनःक्रोशतिस्मात्रधृतराष्ट्रंविगर्हयन ५७ ततोबाहूसमुत्क्षिप्यनिवार्यचसभासदः विदुरःसर्वध
र्मज्ञइदंवचनमब्रवीत ५८ विदुरउवाच द्रौपदीप्रश्नमुक्त्वैवंरोरवीतित्वनाथवत नचविब्रूततंप्रश्नंसभ्याधर्मोत्रपीड्यते ५९
सभांप्रपद्यतेह्यार्त्तःप्रज्वलन्निवहव्यवाट् तंवैसत्येनधर्मेणसभ्याःप्रशमयंत्युत ६० धर्मप्रश्नमथोब्रूयादार्त्तःसत्येनमानवः विब्रूयु
स्तत्रतंप्रश्नंकामक्रोधवलातिगाः ६१ विकर्णेनयथाप्रज्ञमुक्तःप्रश्नोनराधिपाः भवंतोपिहितंप्रश्नंविब्रुवंतुयथामति ६२
योहिप्रश्नंनविब्रूयाद्धर्मदर्शीसभांगतः अनृतेयाफलावाप्तिस्तस्याःसोर्द्धंसमश्नुते ६३ यःपुनर्वितथंब्रूयाद्धर्मदर्शीसभाग
तः अनृतस्यफलंकृत्स्नंसंप्राप्नोतीतिनिश्चयः ६४ अत्राप्युदाहरंतीममितिहासंपुरातनं प्रह्लादस्यचसंवादंमुनेरांगिरसस्यच ६

वनस्यापिनरोभवतिकिल्बिषीति ६० ६२ एतदेवाहयोहिप्रश्नमित्यादिना ६३ आंगिरसस्यसुधन्वनः ६५ ॥ छ ॥ छ ॥ स छ ॥ छ ॥

६६ केशिन्या कन्यया विरोचनसुधन्वानौ पृष्टौ युवयोः कोज्यायान् कुलशीलादिना श्रेष्ठ इति तौ च स्वं स्वं ज्यायस्त्वं प्रतिजानानौ प्राणानेव पणेन दत्त्वा पणं च कृत्वा अ
णयोरिति विषयसप्तमी। पराजितेन यावज्जीवं जेतुर्दास्यं कर्तव्यमित्यर्थः प्राणानामीश्वरस्त्वेवं पसंहारात ६७ ६८ विवदनात् मृषावादयता ब्रह्मदंडः ब्रह्मणा निर्मि

सं० १०६ प्रह्लादो नाम दैतेयस्तस्य पुत्रो विरोचनः कन्याहेतोराङ्गिरसं सुधन्वानमुपाद्रवत् ६६ अहं ज्यायानहं ज्यायानिति कन्येप्सया तदा
तयोर्देवनमत्रासीत्प्राणयोरिति नः श्रुतं ६७ तयोः प्रश्नविवादोभूत्प्रह्लादं तावपृच्छतां ज्यायान्क आवयोरेकः प्रश्नं प्रब्रूहि मा
मृषा ६८ स मृषावचनाद्भीतः सुधन्वानं विलोकयन् तं सुधन्वाब्रवीत्क्रुद्धो ब्रह्मदंड इव ज्वलन् ६९ यदि वै वक्ष्यसि मृषा प्रह्ला
दाथ न वक्ष्यसि शतधा ते शिरो वज्री वज्रेण प्रहरिष्यसि ७० सुधन्वना तथोक्तः सन्व्यथितोश्वत्थपर्णवत् जगाम कश्यपं दै
त्यः परिप्रष्टुं महौजसं ७१ प्रह्लाद उवाच त्वं वै धर्मस्य विज्ञाता दैवस्येहासुरस्य च ब्राह्मणस्य महाभाग धर्मकृच्छ्रमिदं शृणु
७२ यो वै प्रश्नं न विब्रूयाद्वितथं चैव निर्दिशेत् के वै तस्य परे लोकास्तन्ममाचक्ष्व पृच्छतः ७३ कश्यप उवाच जानन्न विब्रुवन्प्र
श्नान्कामात्क्रोधात्भयात्तथा सहस्रं वारुणान्पाशानात्मनि प्रतिमुंचति ७४ साक्षी वा विब्रुवन्साक्ष्यं गोकर्णशिथि
लश्चरन् सहस्रं वारुणान्पाशानात्मनि प्रतिमुंचति ७५ तस्य संवत्सरे पूर्णे पाश एकः प्रमुच्यते तस्मात्सत्यं तु वक्तव्यं जान
तासत्यमंजसा ७६

तः कालदंडः ब्रह्मशाप इत्यपि केचित् ६९ ७० व्यथितः कंपयुक्तः ७१ अविब्रुवन् अविस्पष्टमब्रुवन् ७४ गोकर्णशिथिलः उभयपक्षस्पर्शी प्रतिमुंचति क्षिप एम० १०६
ति ७५ अंजसा तत्त्वतः ७६

धर्मोऽधर्मेण विद्धः द्वयोर्विवदतोरेकः स्वयं मिथ्यावादी यस्त्वितरः धार्मिकं मिथ्यावादीति वदति सोपमधर्मेणाधर्मस्य वेधः तत्रास्य वचनान्मिथ्यावचनात्संदिग्धवचनाद्यायेधर्म
सत्यं न निकृन्तंति न छिंदंतित एव तेनाधर्मेणाविद्धा भवंति ७७ तदेव विवृणोति अर्द्धमिति अर्द्धं अधर्मस्येति शेषः श्रेष्ठः सभापतिः ७८ ७९ इष्टयागादि आपू

विद्धो धर्मो ह्यधर्मेण सभां यत्रोपपद्यते न चास्य शल्यं कृंतंति विद्धास्तत्र सभासदः ७७ अर्द्धं हरति वै श्रेष्ठः पादो भवति कर्तृषु पादश्चैव
सभासत्सु ये न निंदंति निंदितं ७८ अनेना भवति श्रेष्ठो मुच्यंते च सभासदः एनो गच्छति कर्तारं निंदार्हो यत्र निंद्यते ७९ वितथं तु वदेयु
र्ये धर्मं प्रह्लाद पृच्छते इष्टापूर्त्तं च ते घ्नंति सप्त सप्त परावरान् ८० हृतस्वस्य हि यद्दुःखं हतपुत्रस्य चैव यत् ऋणिनः प्रति यच्चैव स्वार्था
द्भ्रष्टस्य चैव यत् ८१ स्त्रियाः पत्या विहीनाया राज्ञा ग्रस्तस्य चैव यत् अपुत्रायाश्च यद्दुःखं व्याघ्राघ्रातस्य चैव यत् ८२ अध्यूढायाश्च
यद्दुःखं साक्षिभिर्विहतस्य च एतानि वै समान्याहुर्दुःखानि त्रिदिवेश्वराः ८३ तानि सर्वाणि दुःखानि प्राप्नोति वितथं ब्रुवन् समक्षदर्श
नात्साक्ष्यं श्रवणाच्चेति धारणात् ८४ तस्मात्सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते कश्यपस्य वचः श्रुत्वा प्रह्लादः पुत्रमब्रवीत् ८५ ॥ ७॥

श्रु॰१

ह्ला॰१

र्त्तं वाप्यादि परावरान् भूतान् भाविनश्च ८० ८२ अध्यूढायाः कृतसपत्नीकायाः ८३ समक्षेति साक्षाद्दर्शनात्साक्ष्यं श्रवणाद्धारणात्स्यार्थस्य धारणात्साक्षीत्य
र्थः ८४ लोभादिदोषात्तत्स्य विप्लावने तु धर्माद्धीयत एवेत्यभिप्रायः ८५ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

स० १०७ श्रेयान्सुधन्वा त्वत्तो वै मत्तः श्रेयांस्तथांगिराः माता सुधन्वनश्चापि मातृतः श्रेयसी तव विरोचन सुधन्वायं प्राणानामीश्वरस्तव ८६ सुध
न्वोवाच पुत्रस्नेहं परित्यज्य यस्त्वं धर्मे व्यवस्थितः अनुजानामि ते पुत्रं जीवत्वेष शतं समाः ८७ विदुर उवाच एवं वै परमं धर्मं श्रुत्वा सर्वे
सभासदः यथाप्रश्नं तु कृष्णाया मन्यध्वं तत्र किं परं ८८ वैशंपायन उवाच विदुरस्य वचः श्रुत्वा नोचुः किंचन पार्थिवाः कर्णो दुःशासनं
त्वाह कृष्णां दासीं गृहान्नय ८९ तां वेपमानां सव्रीडां प्रलपंतीं स्म पांडवान् दुःशासनः सभामध्ये विचकर्ष तपस्विनीं ९० इति महाभार
ते सभापर्वणि द्रौपद्युवाच तावत्प्रतीक्ष दुःप्रहृदुःशासन नराधम पुरस्तात्करणीयं मे न कृतं कार्यमुत्तरं १ विक्लवास्मि कृतानेन क
र्षता बलिना बलात् अभिवादं करोम्येषां कुरूणां संसदि न मे स्यादपराधोयं यदिदं न कृतं मया २ वैशंपायन उवाच सा तेन च समाधूता दुः
खेन च तपस्विनी पतिता विललापेदं सभायामतथोचिता ३ द्रौपद्युवाच स्वयंवरे यास्मि नृपैर्दृष्टा रंगे समागतैः न दृष्टपूर्वा चान्यत्र
साहमद्य सभां गता ४ यां न वायुर्न चादित्यो दृष्टवंतौ पुरा गृहे साहमद्य सभामध्ये दृष्टास्मि जनसंसदि ५ यां न मृष्यंति वातेन स्पृश्य
मानां गृहे पुरा स्पृश्यमानां सहंत्येते पांडवास्तां दुरात्मना ६ मृष्यंति कुरवश्चेमे मन्ये कालस्य पर्ययं स्नुषां दुहितरं चैव क्लिश्यमानामन
र्हतीं ७ किं त्वतः कृपणं भूयो यदहं स्त्री सती शुभा सभामध्यं विगाहेद्य क्व नु धर्मो महीक्षितां धर्म्यां स्त्रियं सभां पूर्वं न नयंतीति नः श्रुतं ८ सभा० १०७
कृष्णां ५

६७ विगाहे पर्यालोचयामि ८ श्रीकृष्णाय नमः ॥ छ ॥ छ ॥

पांडुनांपांडवानां।आर्षिस्तिष्ठितस्तुकुपार्षतस्यधृष्टद्युम्नस्य कथंदास्यांप्राप्नुयां ९ १२ उक्तेति १३ किमत्तत्वान्नविवेक्तुमर्हसिनेत्याह बलवानिति बलवानक
र्णादुर्योधनादिर्यद्धृतेसएवधर्मःपरस्तुदुर्बलेनोक्तः अभिहितोधर्मोप्यधर्मोभवतीतिभावः अभिहितःपरैरितिपाठेत्वधर्मवेलायामपिपरैर्बलवद्भिरुक्तएवध
र्मोभवतिनदुर्बलोक्तइतिआकारंप्रश्लिष्ययोज्यं १४ ननुबलवत्त्वात्त्वमेवसंदेहंछेत्स्यतीत्यतआहनेति विवेक्तुंविविच्यवक्तुं अपमस्याशयः पद्येनामजितासीतिव

सनघःकौरवेयेषुपूर्वैर्धर्मःसनातनः कथंहिभार्यापांडूनांपार्षतस्यस्वसासती ९ वासुदेवस्यचसखीपार्थिवानांसभामियं ९ तामिमां
धर्मराजस्यभार्यांसदृशवर्णजां ब्रूतदासीमदासीवातत्करिष्यामिकौरवाः १० अयंमांसुदृढंक्षुद्रःकौरवाणांयशोहरः क्लिश्नातिनाहंतत्सोढुंचिरं
शक्ष्यामिकौरवाः ११ जितांवाप्यजितांवापिमन्यध्वंमांयथा ... पाः तथाप्रत्युक्तमिच्छामितत्करिष्यामिकौरवाः १२ भीष्मउवाच उक्तवान
स्मिकल्याणिधर्मस्यपरमांगतिं लोकेनशक्यतेज्ञातुमपिविप्रैर्महात्मभिः १३ बलवांस्तुयथाधर्मंलोकेपश्यतिपूरुषः सधर्मोधर्मवेलायां
भवत्यभिहतःपरः १४ नविवेक्तुंचतेप्रश्नमिमंशक्नोमिनिश्चयात सूक्ष्मत्वाद्गहनत्वाच्चकार्यस्यास्यचगौरवात १५ ॥ ७ ॥ ७ ॥

द्योतदा न्यायंविनापीडितैषासघःकोपेनकौरवान्नाशयेत्तथाचद्रौपद्युपमानजोवाकुरुनाशजोवादोषोमह्यांनितिसंशयेधर्मतत्त्वस्यसूक्ष्मत्वाद्दुर्विवेचत्वं देवकार्यमेवनाशे
नभवतीत्यांशंक्यसर्वेषांवध्यानामिहसंप्रयोगाभावातगहनमिदं पांडवानामशक्तत्वातपरदासत्वाच्चतत्स्वामिनांकौरवाणांनाशनंद्रौपद्यास्त्रपिदोषाप ... स्वामि
नाशस्यसुतरामकार्यत्वादितिहेतुत्रयंविविच्याकथनेइतिभावः १५

९।

नकुलवल्लतिरेवधर्मश्चेत्स्वधर्मेणावलवन्नाहमेनाम् शापाग्निनाधक्ष्येऽहपाशंक्याहन्तुमिति अवश्यभाविनिकार्येनलपातपोव्ययः कर्त्तव्य इतिभावः १६ इदमेव

स० १०८ नूनमंतःकुलस्यास्यभवितानचिरादिव तथाहिकुरवःसर्वेलोभमोहपरायणाः १६ कुलेषुजाताःकल्याणिव्यसनेनाहताभृशं धर्म्यान्मा
र्गान्नच्यवंतेयेषांनस्त्वंवधूःस्थिता १७ उपपन्नंचपांचालितवेदंहृत्ममीदृशं यत्कृच्छ्रमपिसंप्राप्ताधर्ममेवान्ववेक्षसे १८ एतेद्रोणाद
यश्चैववृद्धाधर्म्मविदोजनाः शून्यैःशरीरैस्तिष्ठंतिगतासवइवानताः १९ युधिष्ठिरस्तुप्रश्नेस्मिन्प्रमाणमितिमेमतिः अजितांवाजितांवेति
स्वयंव्याहर्तुमर्हति २० इतिसभापर्वणिद्यूते वैशंपायनउवाच तथाचदृष्ट्वाबहुतत्रदेवीरोरूयमाणांकुररीमिवार्ता नोचुर्वचःसाध्वथ
वाप्यसाधुमहीक्षितोधार्त्तराष्ट्रस्यभीताः १ दृष्ट्वातथापार्थिवपुत्रपौत्रांस्तूष्णींभूतान्धृतराष्ट्रस्यपुत्रः स्मयन्निवेदंवचनंबभाषेपांचाल
राजस्यसुतांतदानीं २ दुर्योधनउवाच तिष्ठत्वयंप्रश्नउदारसत्वेभीमेर्जुनेसहदेवेतथैव पत्यौचतेनकुलेयाज्ञसेनिवदंत्वेतेवचनंत्वत्प्रसू
ते ३ अनीश्वरंविब्रुवंत्वार्यमध्येयुधिष्ठिरंतवपांचालिहेतोः कुर्वंतुसर्वेचानृतंधर्मराजंपांचालित्वंमोक्ष्यसेदासभावात् ४ धर्म्मेस्थितो
[illegible]तोधर्मसुतोमहात्मास्वयंचेदंकथयत्विंद्रकल्पः ईशोवातेह्यनीशोथवैषवाक्यादस्यक्षिप्रमेकंभजस्व ५ सर्वेहीमेकौरवेयाःस
भायांदुःखांतरेवर्तमानास्तवैव नविब्रुवंत्यार्यसत्वायथावत्पतींश्चतेसमवेक्ष्याल्पभाग्यान् ६ ॥ छ ॥ छ॥ ॥

नूनंत्वद्दुर्नीरोपपस्थितानातस्त्वमपितथैवातिष्ठस्वेतिद्वाभ्यामाहकुलेष्विति १७ १८ १९ २० अध्यायः तथाच ६ ॥ छ ॥ छ ॥ राम० १०८

सभ्याः प्रशशंसुः तेषांचेलाः चेराः प्रेष्याः क्लवेध्यानि ववेधा न तत्र तत्र सभायां परस्परं संलपनं चक्रुः संकेतं वा चक्रुः सभायां युधिष्ठिरेणोक्तमात्रा वार्त्ता सर्वत्र प्रकीर्तितेत्यर्थः चैलाचैलानवस्त्रभ्रामणमीतिप्रपंचः तत्रैव हाहेति कौरवपक्षपातिषु पांडवानान्यायपक्षपातिनां प्रमाणीकरणो द्रौपदीयस्याः कुक्काभवि

वैशंपायन उवाच ततः सभ्याः कुरुराजस्य तत्र वाक्यं सर्वे प्रशशंसुस्तथोच्चैः चेलावेधांश्चापि चक्रुर्नदंतो हाहेत्यासीदपि चैवार्त्त

नादः ७ श्रुत्वा तु तद्वाक्यमनोहरं तत्तदा हर्षश्चासीत्कौरवाणां सभायां सर्वे चासन्पार्थिवाः प्रीतिमंतः कुरुश्रेष्ठं धार्म्मिकं पूजयंतः ८

युधिष्ठिरं च ते सर्वे समुदैक्षंत पार्थिवाः किंनु वक्ष्यति धर्म्मज्ञ इति साचीकृताननाः ९ किंनु वक्ष्यति बीभत्सुरजितो युधि पांडवः भीमसे

नो यमौ चोभौ भृशं कौतूहलान्विताः १० तस्मिन्नुपरते शब्दे भीमसेनोऽब्रवीदिदं प्रगृह्य रुचिरं दिव्यं भुजं चंदनचर्चितं ११ भीमसेन उवा

च येष धर्म्मराजो महात्मनः नप्रभुः स्यात्कुलस्यास्य न वयं मर्षयेमहि १२ ईशो नः पुण्यतपसां प्राणानामपि

चेश्वरः मन्यते जितमात्मानं यद्येष विजिता वयं १३

ष्यतीति तेन च सर्वेषां मस्माकं दुःखं भविष्यतीत्यभिप्रायः ७ ८ साचीति पर्यक्षु ९ ११ यद्ययं नः कुलस्य प्रभुर्न स्यात्तर्हि न मर्षयेमहि यतो यं प्रभुस्ततो मर्षयामहे इत्य

र्थः १२ ईश इति अजितमिति च्छेदः द्रौपदीपणनात्प्राग्इति शेषः यद्ययमात्मानमपराजितं मन्यते तर्हि वयं पूर्वमेव भवद्भिर्जिताः संतः इदानीं विजितान्द्रौपद्यर्थे

मिथ्यावादेन सुतरां जिताः स्म इत्यर्थः अतो द्रौपदी न दासभावमापन्नेति भावः १३ घ १

नत्वजितेनापित्वयाकिंस्यात्तत्राहनहीत्यादि २४ २५ पाशसितःपाशबद्धः १६ तलाभिमिन्चपेटाखड्गैः १७ १८ अध्यायः अपःकिलेमेसधनाःसभायांभी
स० ष्मःक्षत्ताकौरवाणांगुरुश्च येत्वामिनेदुष्टतमंवदंतिवांछंतिहृष्टेनचविह्निपंतीति श्लोकःप्रथमःअपःकिलेमे अधनाइतिद्वितीयः सधनाःसमर्थाःधर्म्मोपरोधिनेइ
१०९ त्यर्थः वृद्धिस्वामिनःमूलछेदं नचविह्निपंति पापकरणेव्याकुलाश्चनभवंति १ दासस्यपत्नीहीनेश्वरीदासधनंचसर्वंहीनेश्वरंसतभद्रेकल्याणाभाजितयो

नहिमुच्येतमेजीवनपयाम्भःमिमुपस्यशान मन्त्रधर्म्माःपरामृष्यपांचाल्यामर्द्धजानिमान २४ पश्यध्वंघापतोहन्तोमुजोमेपरिघाइव
नैतयोरंतरंप्राप्यमुच्येतापिशतक्रतुः २५ धर्म्मपाशसितस्त्वेवंनाधिगच्छामिसंकटं गौरवेणानिरुद्धश्चनिग्रहादर्जुनस्यच १६ ध
र्मराजनिसप्टष्टः सिंहःक्षुद्रमृगानिव धार्त्तराष्ट्रानिमान्पायान्निष्पिषेयंतलासिभिः १७ वैशंपायनउवाच तमुवाचतदाभीष्मो द्रो
णोविदुरएवच क्षम्यतामिदमित्येवंसर्वसंभाव्यतेत्वयि १८ इतिसभापर्वणिद्यूते कर्णउवाच अपःकिलेतेसधनाःसभायांभीष्मः
क्षत्ताकौरवाणांगुरुश्च येस्वामिनेदुष्टतमंवदंतिवांछंतिहृद्धिंनचविह्निपंति १ अयःकिलेमेह्यधनाभवंतिदासःशिष्यश्चास्वतंत्रश्च
नारी दासस्यपत्नीत्वधनस्यभद्रेहीनेश्वरीसधनेचसर्वं २ प्रविश्यराज्ञःपरिवारंभजस्वतत्तेकार्यंशिष्टमादिश्यतेत्र ईशास्तुस
र्वेतवराजपुत्रिभवंतिवैधार्त्तराष्ट्रानपार्थाः ३

८२

रीश्वरेद्रूपमपितत्त्स्यसनीयमित्यर्थःतथाचस्मृतिः अपएवाधनालोकेभार्यादासस्तथासुतः यत्तेसमधिगच्छंतियस्यैतेतस्यतद्धनमिति ततथाचराजजयैनै सभा०
वतस्यात्मपिजितेवनतुतत्रअजितेनजितेनवापराजितेति विमर्शःसंभवतीतिभावः २ परिवारंदारानभजस्वपादसंवाहनादिनासेवस्व ३ ॥ ७ ॥ ७ ॥ १०९

अन्यमितिपतिजयेनात्मजयं नमन्यसे चेत्पतिकालेरत्वर्थं अन्यं पतिं वृणीष्वापतिषु कामव्रत्तिर्यद्येषं वर्त्तनं लोके स्त्रीणामवाच्यं दास्येतत्तत्र विदितं प्रसिद्धं अतःपरमितप
तिकाद्दारभावाद्दत्तेनपतिकं दास्यमेवतवास्तीति भावः ४ नैवसंति अस्मद्दासाःपांडवा अस्माभिः प्रत्याख्यातान्वेतत्त्वांनैवभोक्तुंसमर्था भवेयुरिति भावः ५ प्रयोजनमितिपञ्चमां

अन्यंवृणीष्वपतिमाद्यभाविनियस्माद्दास्यंनलभसि देवनेन अवाच्यावैपतिषुकामवृत्तिर्नित्यंदास्येविदितंतत्रवास्तु ४ पराजितो नकुलो भीम
सेनो युधिष्ठिरः सहदेवार्जुनौ च दासीभूतात्वंहि वै याज्ञसेनि पराजितास्ते पतयो न संति ५ प्रयोजनं चात्मनि किं नु मन्यते पराक्रमं पौरुषं चैव पार्थः
पांचाल्यस्य द्रुपदस्यात्मजामिमां सभामध्ये योऽतिदेवीत् ग्लहेषु ६ वैशंपायन उवाच तद्वै श्रुत्वा भीमसेनोत्यमर्षी भृशं निशश्वास तदार्तरूपः
राजानुगो धर्मपाशानुबद्धो दहन्निवैनं क्रोधसंरक्तदृष्टिः ७ भीम उवाच नाहं कुप्येयं सूतपुत्रस्य राजन्नेतत्सत्यं दासधर्मं प्रविष्टाः किं विद्विषो वै मा
मेवं व्याहरेयुर्नरेन्द्र देवी त्वं यद्यनया नरेंद्र ८ वैशंपायन उवाच भीमसेनवचः श्रुत्वा राजा दुर्योधनस्तदा युधिष्ठिरमुवाचेदं तूष्णींभूतमचेतनं ९
भीमार्जुनौ यमौ चैव स्थितौ ते नृप शासने प्रश्नं ब्रूहि च कृष्णां त्वमजितां यदि मन्यसे १० एवमुक्त्वा तु कौंतेयमपोह्य वसनं स्वकं स्मयन्निवैक्ष्य पां पं६
चालीमैश्वर्यमदमोहितः ११ कदलीदंडसदृशं सर्वलक्षणसंयुतं गजहस्तप्रतीकाशं वज्रप्रतिमगौरवं १२ अभ्युत्स्मयित्वा राधेयं भीममा
धर्षयन्निव द्रौपद्याः प्रेक्षमाणायाः सव्यमूरुमदर्शयत् १३ भीमसेनस्तमालोक्य नेत्रे उत्फाल्य लोहिते प्रोवाच राजमध्ये तं सभां विश्रावयन्नि
व १४ पितृभिः सह सालोक्यं मास्म गच्छेद्वृकोदरः यद्येतमूरुं गदया न भिंद्यां ते महाहवे १५ क्रुद्धस्य तस्य सर्वेभ्यः स्रोतोभ्यः पावकार्चिषः वृ
क्षस्येव विनिश्चेरुः कोटरेभ्यः प्रदह्यतः १६ विदुर उवाच परं भयं पश्यत भीमसेनात्तद्बुध्यध्वं पार्थिवाः प्रातिपेयाः दैवेरितो नूनमयं पुरस्तात्परो
नयो भरतेषूदपादि १७ अतिद्यूतं कृतमिदं धार्तराष्ट्रा यस्मात्स्त्रियं विवदध्वं सभायां योगक्षेमौ नश्यतो वः समग्रौ पापान्मंत्रान् कुरवो मंत्र
यंति इमं धर्मं कुरवो जानताशु ध्वस्ते धर्मे परिषत्संप्रदुष्येत १८

यदेवीत्सजन्मनि प्रयोजनं जन्मसाफल्यं किं न मन्यते जडोऽपि त्वमन्यत एव एवं पराक्रमादावपि योज्यं एषदासधर्मः मर्तुरूत्कर्षवर्णनं ६ १० अपोह्य अपकृष्य ११
१२ अभ्युत्स्मयित्वा प्रोत्साह्य १३ १४ उदपादि उत्पन्नः १७ अतिद्यूतं पणितद्रव्यमर्यादामतिक्रांतं यो गो लब्धेन राज्यादिना संबंधस्तत्स्पर्द्धे मेकत्याणां प
रिषत्सभा संप्रदुष्येत धर्मातिक्रमादिति शेषः १८

तंसद्दि २ तृ नी

कितवोयुधिष्ठिरः अपराजितात्मासन्सर्वंचेत् अग्लहीष्यत पणीकृतवानभविष्यत्तर्हिसामवद्दासीस्यादेवेतिभावः यस्ययेनधनेनांशोदीव्यतितततस्त्वत्तोपथानि
धनंआभासजितंधनंजितंपर्थः यस्यैतेनस्यतत्कृनमितिस्मतिस्तदासभावेर्जितंधनंस्वामिगामीस्याहिन्नततःप्राक्तनमपीति १९ मापयातमागच्छतअग्निहोत्रे

दृ ३

स० ११० इमांचेत्सर्वंकितवोग्लहीष्यद्दीशोभविष्यत्पराजितात्मा स्वमेयथैतद्धिजितंधनंस्यादेवंमन्येयस्यदीव्यत्यनीशः १९ गांधारराजस्यवचोनि
शम्यधर्मादस्मात्कुरवोमापयात २० दुर्योधनउवाच भीमस्यवाक्येतद्वदेवार्जुनस्यस्थितोहंवैयमयोश्चैवमेव युधिष्ठिरंतेप्रवदंत्वनीशमथो
दास्यान्मोक्ष्यसेयाज्ञसेनि २१ अर्जुनउवाच ईशोराजापूर्वमासीद्ग्लहेनः कुंतीसुतोधर्मराजोमहात्मा ईशस्त्वयंकस्यपराजितात्मातज्जानीध्वं
कुरवःसर्वएव २२ वैशंपायनउवाच ततोराज्ञोधृतराष्ट्रस्यगेहेगोमायुरुच्चैर्व्याहरदग्निहोत्रे तंरासभाःप्रत्यभाषंतराजन्समंततःपक्षिणश्चै
वरौद्राः २३ तंवैशब्दंविदुरस्तत्ववेदीशुश्रावघोरंसुबलात्मजाच भीष्मोद्रोणोगौतमश्चापिविद्वान्स्वस्तिस्वस्तीत्यपिचैवाहुरुच्चैः २४ ततो
गांधारीविदुरश्चापिविद्वांस्तमुत्पातंघोरमालक्ष्यराज्ञे निवेदयामासतुरार्त्तवत्तदाततोराजावाक्यमिदंबभाषे २५ धृतराष्ट्रउवाच हतोसिदुर्यो
धनमन्दबुद्धेयस्त्वंसभायांकुरुपुंगवानां स्त्रियंसमाभाषसिदुर्विनीतविशेषतोद्रौपदींधर्मपत्नीं २६ एवमुक्त्वाधृतराष्ट्रोमनीषीहितान्वेषी
बांधवानामपायात कृष्णांपांचालीमब्रवीत्सांत्वपूर्वंविमृश्यैतत्प्रज्ञयातत्त्वबुद्धिः २७ धृतराष्ट्रउवाच वरंवृणीष्वपांचालिमत्तोयदभिवांछ
सि वधूनांहिविशिष्टामेत्वंधर्मपरमासती २८ द्रौपद्युवाच ददासिचेद्वरंमह्यंवृणोमिभरतर्षभ सर्वधर्मानुगःश्रीमानदासोस्तुयुधिष्ठिरः
२९ मनस्विनमजानंतोमैवंब्रूयुःकुमारकाः एषवैदासपुत्रोहिप्रतिविंध्यंममात्मजं ३० राजपुत्रःपुराभूत्वायथानान्यःपुमान्क्वचित राजलां
लितस्यास्यनयुक्तादासपुत्रता ३१ मि १ स० ११०

गृह्याग्निसमीपे २० २३ सुबलात्मजागांधारी २४ २९ प्रतिविंध्यंयुधिष्ठिरसुतं ३० ३१ ॥ छ ॥ छ ॥

स्ववशान्अपराधीनान् ३३ ३४ वरंआदातुं नोत्सहे यतोऽनर्हा ३५ अनर्हत्वमेवाह एकमिति ३६ पापीयांसः दासभावेन नीचाः वेत्स्यंति लप्स्यंति विद्लाभे इ
त्यस्य रूपं ३७ अध्यायः यान १ २ अप्लवे नौकाहीने अप्रतिष्ठे अगाधे अंभसि अंभसि विपत्समुद्रे ३४ ज्योतींषि लोकप्रकाशकानि अपत्यं कर्म विद्या चेति

धृतराष्ट्र उवाच एवं भवतु कल्याणि यथा त्वमभिभाषसे द्वितीयं ते वरं भद्रे ददामि वरयस्व ह ३२ मनो हि मे वितरति नैकं त्वं वरमर्हसि द्रौपद्यु
वाच सरथौ सधनुष्कौ च भीमसेनधनंजयौ यमौ च वरये राजन्नदासान्स्ववशानहं ३३ धृतराष्ट्र उवाच तथास्तु ते महाभागे यथा त्वं नंदिनी
छसि तृतीयं वरयास्मत्तो नासि द्वाभ्यां सुसंस्तुता त्वं हि सर्वस्नुषाणां मे श्रेयसी धर्मचारिणी ३४ द्रौपद्युवाच लोभो धर्मस्य नाशाय भगवन्ना
हमुत्सहे अनर्हा वरमादातुं तृतीयं राजसत्तम ३५ एकमाहुर्वैश्यवरं द्वौ तु क्षत्रस्त्रियो वरौ त्रयस्तु राज्ञो राजेंद्र ब्राह्मणस्य शतं वराः ३६ पा
पीयांस इमे भूत्वा संतीर्णाः पतयो मम वेत्स्यंति चैव भद्राणि राजन्पुण्येन कर्मणा ३७ इति सभापर्वणि द्यूते कर्ण उवाच यानः श्रुता मनु
ष्येषु स्त्रियो रूपेण संमताः तासामेतादृशं कर्म न कस्याश्चन शुश्रुम १ क्रोधाविष्टेषु पार्थेषु धार्त्तराष्ट्रेषु चाप्यति द्रौपदी पांडुपुत्राणां
कृष्णा शांतिरिहाभवत् २ अप्लवेंभसि मग्नानामप्रतिष्ठे निमज्जतां पांचाली पांडुपुत्राणां नौरेषा पारगाभवत् ३ वैशंपायन उवाच त
द्वै श्रुत्वा भीमसेनः कुरुमध्ये त्यमर्षणः स्त्रीगतिः पांडुपुत्राणामित्युवाच सुदुर्मनाः ४ भीम उवाच त्रीणि ज्योतींषि पुरुष इति वै देवलोऽब्रवीत्
अपत्यं कर्म विद्या च यतः सृष्टाः प्रजास्ततः ५

प्रजाः १

यतः यस्माद्धेतोः ततः ज्योतिस्त्रयात् स्थावरजंगमाः सृष्टाः अयं भावः कर्मोपास्तिप्राप्यं लोकद्वयं अपत्यप्राप्यश्चायं लोकः तथा च श्रुतिः सोयं लोकः पुत्रेणैव जय्यो नान्ये
न कर्मणा पितृलोको विद्यया देवलोक इति विद्या उपासना पितृलोकः स्वर्गः देवलोको ब्रह्मलोकः ५ ॥ छ ॥ छ ॥ छ ॥ ॥

मभि॰ २ — स्य २

मरणांतरमेता॰ न्येकस्यो॰ नीप्युपकरं कुर्वतीत्याह॰ अमेध्ये अशुचौ ६ तत्रहति नः दाराणामिति॰ संभितिः संबंधः तत्परकीयं अपत्यादिकं ज्योतिः अस्मदीयानां दारा
स० १११ णां मर्शनादभिहते अभितः सर्वतः हतानेहातमस्माभिरित्यर्थः अभिहतमिति पाठे आरोहात् गतावित्यस्य रूपं पः संसरदिपरस्यान स्या धुन्न त्रपते स वि विके ऽ वं स्वपारदारि
कः स्यादेवेति भावः एवं सर्वानतिनिंदित्वा कर्णायोमुद्दिश्याहथ नेजयेतितथाच अभिमर्षजं परे रुमिमर्षेभ्योयरेभ्यो जातमपत्यं किं तु स्यात संकरजत्वान्नीचकर्मकृदेव स्यात।

न

अमेध्ये वै गतप्राणो शून्ये ज्ञातिभिरुज्झिते देहे त्रितयमेवैतत्पुरुषस्योपयुज्यते ६ तन्नोज्योतिरभिहतं दाराणामभिमर्शनात धनंजय कथं स्वित्स्या
दपत्यमभिमृष्टजम ७ अर्जुन उवाच न चैवोक्ता न चानुक्ता हीनतः परुषा गिरः भारत प्रतिजल्पंति सदा तूत्तमपूरुषाः ८ स्मरंति सुकृता
न्येव न वैराणि कृतान्यपि सन्तः प्रतिविजानंतो लब्ध्वा प्रत्ययमात्मनः ९ भीम उवाच इहैवैतांस्तुरान्सर्वान्हन्मि शत्रून्समागतान अथ निष्क्रम्य
राजेंद्र समूलान्कृन्धि भारत १० किं नो विवदितेनेह किमुक्तेन च भारत अद्यैवैतान्निहन्मीह प्रशाधि पृथिवीमिमां ११ इत्युक्त्वा भीम
सेनस्तु कनिष्ठैर्भ्रातृभिः सह मृगमध्ये यथा सिंहो मुहुर्मुहुरुदैक्षत १२ सांत्व्यमानो वीक्ष्यमाणः पार्थेनाक्लिष्टकर्मणा खिद्यत्येव महाबाहुरं
तर्दाहेन वीर्यवान १३ क्रुद्धस्य तस्य स्रोतोभ्यः कर्णादिभ्यो नराधिप सधूमः सस्फुलिंगार्चिः पावकः समजायत १४ ॥ ७१ ॥ ७ ॥

उदु २

जानं २

स्तवीजाद्धीरोत्पत्तेरसंभयातकं सवत्करोपि च असुरवीजोद्भवक्रूरकर्मकरत्वादिति भावः ७ हीनतः हीनतः हीनैः प्रतिजल्पंति प्रत्युत्तरयंति ८ प्रतिविजानंतः कृत
स्य प्रतीकारं ते लब्धसंभावनाः प्राप्तपूजाः ९ इहैवैतांस्तुरान्सर्वानातुरान्त्वरया त्वरया त्वरतेः क्विपि ज्वरत्वरेत्युपधायाऊठ एतांनस्तुतानित्यपपाठः निष्क्र एम० १११
म्य इतः स्थानादिति शेषः समूलान कोशदुर्गादिसहितान १० विवदितेन विवादेन ११ १३ स्रोतोभ्यः निर्गममार्गेभ्यः १४ ॥ ७१ ॥ ७ ॥

अ॰

१५ जोषंतूष्णीं उपविश्य १६ १७ अध्यायः राजन् १ अरिष्टं निर्विघ्नं २ ३ यतइति शांतिरेव बुद्धेः फलमित्यर्थः अदारुणिकाष्ठभिन्ने पाषाणादौ मदु
रेव बाध्यत इत्यर्थः ५ बाधनेपिसतांक्षमामाहअभेति ६ संतइति प्रत्युपकाराशया उपकारं न कुर्वंतीत्यर्थः ७ अधनमध्यमोत्तमानां कलहप्रसंगे वृत्तमाह संवादे इ

भ्रुकुटीकृतदुःप्रेक्ष्यमभवत्तस्य तन्मुखं युगांतकाले संप्राप्ते कृतांतस्येव रूपिणः १५ युधिष्ठिरस्तमावार्य बाहुना बाहुशालिनं मैवमित्य
ब्रवीच्चैनं जोषमास्वेति भारत १६ निवार्य च महाबाहुं कोपसंरक्तलोचनं पितरं समुपातिष्ठद्धृतराष्ट्रं कृतांजलिः १७ इति सभापर्व
णि द्यूते युधिष्ठिर उवाच राजन्किं करवामस्ते प्रशाध्यस्मांस्त्वमीश्वरः नित्यं हि स्थातुमिच्छामस्तव भारत शासने १ धृतराष्ट्र उ
वाच अजातशत्रो भद्रं ते अरिष्टं स्वस्ति गच्छत अनुज्ञाताः सहधनाः स्वराज्यमनुशासत २ इदं चैवावबोद्धव्यं वृद्धस्य मम शा
सनं मया निगदितं सर्वं पथ्यं निःश्रेयसं परं ३ वेत्थ त्वं तात धर्माणां गतिं सूक्ष्मां युधिष्ठिर विनीतोसि महाप्राज्ञ वृद्धानां पर्युपासिता
४ यतो बुद्धिस्ततः शांतिः प्रशमं गच्छ भारत नादारुणि पतेच्छस्त्रं दारुण्येतन्निपात्यते ५ न वैराण्यभिजानंति गुणान्पश्यंति नागुणा
न् विरोधं नाधिगच्छंति ये त उत्तमपूरुषाः ६ स्मरंति सुकृतान्येव न वैराणि कृतान्यपि संतः परार्थं कुर्वाणा नावेक्षंते प्रतिक्रियां
७ संवादे परुषाण्याहुर्युधिष्ठिर नराधमाः प्रत्याहुर्मध्यमास्त्वेतानुक्ताः परुषमुत्तरं ८ नचोक्ता नैव चानुक्तास्त्वहिताः परुषागि
रः प्रतिजल्पंति वै धीराः सदा तूत्तमपूरुषाः ९

ति ८ दुर्वचोभिरुक्ताः अनुक्ता वा संतः अहिताः दुःखकर्त्रीः यतः परुषाः मर्मच्छिद इत्यादि शीर्गिरः ९ ॥ छ ॥ ॥ छ ॥ छ ॥ ॥

संतइतिआत्मौपम्येनपरस्यापिदुःखंमाभूदितिजानंतइत्यर्थः १० भ्रातृभिर्दुर्योधनादिभिः १६ सर्वंसमर्थंकृत्वालब्ध्वापत्नत्रथैवास्त्विनिप्रतिज्ञाय १७ १८ इति
नैलकंठीयेसभापर्वभावदीपेद्यूतंसमाप्तं॥ ॥ अनुज्ञा १ धृतराष्ट्रेणयथाप्रतिज्ञंमुक्ताद्रौपदीपुरुषकाराद्वलवान्दैवंकौरवानसर्वभूपद्धपद्धतौ अनुद्यूतेप्रावर्त

स० ११२ स्मरंतिसुकृतान्येवनवैराणिकृतान्यपि संतःप्रतिविजानंतोलब्ध्वाप्रत्ययमात्मनः १० असंभिन्नार्थमर्यादाःसाधवःप्रियदर्शनाः तथाच
रितमार्य्येणत्वयास्मिन्सत्समागमे ११ दुर्योधनस्यपारुष्यंतत्तातहृदिमाकृथाः मातरंचैवगांधारींमांचत्वंगुणकांक्षया १२ उपस्थितं
वृद्धमंधंपितरंपश्यभारत प्रेक्षापूर्वंमयाद्यूतमिदमासीदुपेक्षितं १३ मित्राणिद्रष्टुकामेनपुत्राणांचबलाबलं अशोच्याःकुरवोराजन्
येषांत्वमनुशासिता १४ मंत्रीचविदुरोधीमानसर्वशास्त्रविशारदः त्वयिधर्मोर्जुनेधैर्यंभीमसेनेपराक्रमः १५ श्रद्धाचगुरुशुश्रूषायम
योःपुरुषाग्र्ययोः अजातशत्रोभद्रंतेखांडवप्रस्थमाविशत भ्रातृभिस्तेस्तुसौभ्रात्रंधर्मेतेधीयतांमनः १६ वैशंपायनउवाच इत्युक्तो
भरतश्रेष्ठधर्मराजोयुधिष्ठिरः कृत्वार्यसमयंसर्वंप्रतस्थेभ्रातृभिःसह १७ तेरथान्मेघसंकाशानास्थायसहकृष्णया प्रययुर्हृष्टमन
सः इंद्रप्रस्थंपुरोत्तमं १८ इतिसभापर्वणिद्यूतंसमाप्तं जनमेजयउवाच अनुज्ञातांस्तान्विदित्वासरत्नधनसंचयान् पांडवान्धा
र्तराष्ट्राणांकथमासीन्मनस्तदा १ वैशंपायनउवाच अनुज्ञातांस्तान्विदित्वाधृतराष्ट्रेणधीमता राजन्दुःशासनःक्षिप्रंजगामभ्रातरं
प्रति २ दुर्योधनंसमासाद्यसामात्यंभरतर्षभ दुःखार्तोभरतश्रेष्ठइदंवचनमब्रवीत ३ ॥ छ ॥ छ ॥ छ ॥

पदित्याह अनुज्ञातानिति २ भरतश्रेष्ठःभरतस्यदुर्योधनस्यधर्षणाश्रेष्ठःप्रशस्यतमोदुःशासनः ३ ३ ३ ॥ छ ॥ छ ॥ छ ॥ छ ॥ राम० ११२

स्थविरो वृद्ध इति साधिक्षेपमुक्तं शात्रुसात शत्रुवशं गामयत अगामयत प्रापितवान ४ पांडवान प्रति प्रतिकर्तुं ५ ६ त्वपाहूर्तं किं नश्रुतमिति काङ्क्षा न जोयोजना अपि
तु श्रुतमेव ७ पुरा युद्धात युद्धमकृत्वेत्यर्थः बलात युद्धं न वा ये अहितं कुर्वंति ते निहंतव्या इति योजना तान ८ पाण्डवान परिहास्यति न त्यक्ष्यति ९ १० ११ परमेषु

दुःशासन उवाच दुःखेनैतत्समानीतं स्थविरो नाशयत्यसौ शात्रुसाद्गमयत द्रव्यं तद्बुध्यस्व महारथाः ४ अथ दुर्योधनः कर्णः श
कुनिश्चापि सौबलः मिथः संगम्य सहिताः पांडवान प्रतिमानिनः ५ वैचित्रवीर्यं राजानं धृतराष्ट्रं मनीषिणं अभिगम्य त्वरायुक्ताः श्ल
क्ष्णं वचनमब्रुवन ६ दुर्योधन उवाच न त्वयेदं श्रुतं राजन यज्जगाद बृहस्पतिः शक्रस्य नीतिं प्रवदन विद्वान देवपुरोहितः ७ स
र्वोपायैर्नियंतव्याः शत्रवः शत्रुसूदनः पुरा युद्धात्बलाद्वापि प्रकुर्वंति तवाहितं ८ ते वयं पांडवधनैः सर्वान्संपूज्य पार्थिवान यदि तान
योधयिष्यामः किं वै नः परिहास्यति ९ अहीनाशीविषान्क्रुद्धान्नाशाय समुपस्थितान कृत्वा कंठे च पृष्ठे च कः समुत्स्रष्टुमर्हति १०
आत्तशस्त्रा रथगताः कुपितास्तात पांडवाः निःशेषं वः करिष्यंति क्रुद्धा ह्याशीविषा इव ११ सन्नद्धो ह्यर्जुनो याति विधृत्य परमेषु
धी गांडीवं मुहुरादत्ते निःश्वसंश्च निरीक्षते १२ गदां गुर्वीं समुद्यम्य त्वरितश्च वृकोदरः स्वरथं योजयित्वाशु निर्यात इति नः श्रुतं १३
नकुलः खड्गमादाय चर्म चाप्यर्धचंद्रवत सहदेवश्च राजा च चक्रुराकारमिंगितैः १४ ते त्वास्थाय रथान्सर्वे बहुशस्त्रपरिच्छदान अ
भिघ्नंतो रथव्रातान्सेनायोगाय निर्ययुः १५ न क्षंस्यंते तथास्माभिर्जातु विप्रकृता हि ते द्रौपद्याश्च परिक्लेशं कस्तेषां क्षंतुमर्हति
१६
धीन् श्रेष्ठो निषंगौ १२ १३ आकारं अभिप्रायं इंगितैश्चेष्टितैः चक्रुः आविश्चक्रुः कृतविक्षेपेः स्वरूपं १४ सेनायोगाय सैन्यमेलनाय १५ न क्षंस्यंते न
क्षमां करिष्यंते जातु कदाचित् विप्रकृताः विकारं प्रापिताः तेषां मध्ये १६ ॥ ७ ॥ ॥ ७ ॥ ७ ॥ ७ ॥:ः॥ ॥

वसवत पुत्रो

१८ सजनेनसमानजनेनअज्ञाताः १९ सविद्यांस्त्रद्वशीकरणविद्यासहितां २२ २३ सारवतं व्य ध्वगतान द्गतान २४ वैश्यापुत्रस्तुः २५ २६ अका

स० ११३ पुनर्दीव्याममद्भूतेवनवासायपांडवैः एवमेतान्वशेकर्त्तुंशक्यामःपुरुषर्षभ १७ तेवाद्वादशवर्षाणिवयंवाद्यूतनिर्जिताः प्रवि
शेममहारण्यमजिनैःप्रतिवासिताः १८ त्रयोदशंच सजनेअज्ञाताःप्रतिवत्सरं ज्ञाताश्चपुनरन्यानिवनेवर्षाणिद्वादश
१९ निवसेमवयंतेवातथाद्यूतंप्रवर्त्ततां अक्षानुप्त्वापुनर्द्यूतमिदंकुर्वंतुपांडवाः २० एतत्कृत्यतमंराजन्नस्माकंभरतर्षभ अ
यंहिशकुनिर्वेदसविद्यामक्षसंपदं २१ दृढमूलावयंराज्येमित्राणिपरिगृह्यच सारवद्विपुलंसैन्यंसत्कृत्यचदुरासदं २२ तेचत्रयो
दशंवर्षंपारयिष्यंतिचेद्व्रतं जेष्यामस्तान्वयंराजन्रोचतांतेपरंतप २३ धृतराष्ट्रउवाच तूर्णंप्रत्यानयस्वैतान्कामंव्यध्वगतान
पि आगच्छंतुपुनर्द्यूतमिदंकुर्वंतुपांडवाः २४ वैशंपायनउवाच ततोद्रोणःसोमदत्तोवाह्लीकश्चैवगोतमः विदुरोद्रोणपुत्र
श्चवैश्यापुत्रश्चवीर्यवान् २५ भूरिश्रवाःशांतनवोविकर्णश्चमहारथः माद्यूतमित्यभाषंतशमोस्त्विति चसर्वशः २६ अकामा
नांचसर्वेषांसुहृदामर्थदर्शिनां अकरोत्पांडवाह्वानंधृतराष्ट्रःसुतप्रियः २७ इतिसभापर्वणि वैशंपायनउवाच अथाब्र
वीन्महाराजधृतराष्ट्रंजनेश्वरं पुत्रहार्दाद्धर्मयुक्तंगांधारीशोककर्शिता १ जातेदुर्योधनेक्षत्तामहामतिरभाषत नीयतांप
रलोकायसाध्वयंकुलपांसनः व्य नदज्जातमात्रोहिगोमायुरिवभारत अंतोनूनंकुलस्यास्यतन्निबोधतभारत ३ मानिमज्जीः
स्वदोषेणमहाप्सुत्वंहिभारत वालानामविशिष्टानांमामतिंस्थंतिवेप्रभो ४ माकुलस्यक्षयेघोरेकारणंत्वंभविष्यसि वद्धंसेतुं
कोनुभिंद्याद्धमेच्छांतंचपावकं ५

मानांघूतमनिच्छतां २८ अध्यायः अथाब्र ३ मतिंमाभिमंस्थाः अभिमतांमाकुरु ४ धमेत उद्दीपयेत ५ छ ॥ छ ॥ छ ॥ ॥ रम० ११३

त्वन्नेत्राः त्वमेव नेता येषां ते त्वन्नेत्राः दीर्णाः त्वत्तो भिन्नमर्यादाः संतः प्रहास्यसि ‍ःजीवितत्यागेनेतिशेषः ८ ९ माप्रमादीः अनवहितो माभूः १० मदुपोढाम् उपसमाहिता

शमे स्थितान्नकोन्वपार्थान्नकोपयेद्भरतर्षभ स्मरंतंत्वामाजमीढं स्मारयिष्याम्यहं पुनः ६ शास्त्रं न शास्ति दुर्बुद्धिं श्रेयसे चेतराय च नवै
वृद्धो बालमतिर्भवेद्राजन्कथंचन ७ त्वन्नेत्राः संतु ते पुत्रा मा त्वां राजन्प्रहासिषुः तस्मादयं मद्वचनात्त्यज्यतां कुलपांसनः ८ तथा ते
न कृतं राजन्पुत्रस्नेहान्नराधिप तस्य प्राप्तं फलं विद्धि कुलांतकरणाय यत् ९ शमेन धर्मेण परस्य बुद्ध्या जाता बुद्धिर्यास्तु ते मा प्रती
या प्रध्वंसिनी क्रूरसमाहिता श्रीर्मृदुप्रौढा गच्छति पुत्रपौत्रान् १० अथाब्रवीन्महाराजो गांधारीं धर्मदर्शिनीं अंतः कामं कुलस्यास्तु
न शक्नोमि निवारितुं ११ यथेच्छसि तथैवास्तु प्रत्यागच्छंतु पांडवाः पुनर्द्यूतं च कुर्वंतु मामकाः पांडवैः सह १२ इति सभापर्वणि वैशंपा
यन उवाच ततो व्यध्वगतं पार्थं प्रातिकामी युधिष्ठिरं उवाच वचनाद्राज्ञो धृतराष्ट्रस्य धीमतः १ उपास्तीर्णा सभा राजन्नक्षानुप्त्वा युधिष्ठि
र एहि पांडव दीव्येति पिता त्वाहेति भारत २ युधिष्ठिर उवाच धातुर्नियोगाद्भूतानि प्राप्नुवंति शुभाशुभं न निवृत्तिस्तयोरस्ति देवि
तव्यं पुनर्यदि ३ अक्षद्यूते समाह्वानं नियोगात्स्थविरस्य च जानन्नपि क्षयकरं नातिक्रमितुमुत्सहे ४ वैशंपायन उवाच असं
भवे हेममयस्य जंतोस्तथापि रामो लुलुभे मृगाय प्रायः समासन्नपराभवानां धियो विपर्यस्ततरा भवंति ५ इति ब्रुवन्निववृते भ्रात
भिः सह पांडवः जानंश्च शकुनेर्मायां पार्थो द्यूतमियात्पुनः ६ विविशुस्ते सभां तां तु पुनरेव महारथाः व्यथयंति स्म चेतांसि सुहृदां भरत
र्षभाः ७

सती प्रोढा भूत्वा १० अंततो नाशः कामं यथेष्टं ११ १२ अध्यायः ततो व्यध्वेति असंभवे इति धृतराष्ट्रसुहृदि श्लोकत्रयं ५ ६ ७ ॥ ७ ॥ ७ ॥

यथोपजोषं यथासुखं ८ पूजितं दृष्टं ९ १४ व्यवसायेन निश्चयेन १५ संवेगात् अतिशयात् १६ एनं दुर्योधनं हे भरतर्षभ धृतराष्ट्र १७ क्रियाकार्यं रणपदोषान्वित

ऊँ३

स० ११४ यथोपजोषमासीनाः पुनर्द्यूतप्रवर्तनाये सर्वलोकविनाशाय दैवेनोपनिपीडिताः ८ शकुनिरुवाच अमुं च तस्य विरोयह्योषनं पूरितमे
वतत् महाधनं ग्लहं त्वेकं शृणु मे भरतर्षभ ९ वयं वा द्वादशाब्दानि युष्माभिर्द्यूतनिर्जिताः प्रविशेम महारण्यं रौरवाजिनवाससः १०
त्रयोदशं च सजने अज्ञाताः परिवत्सरं ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश ११ अस्माभिर्निर्जिताः यूयं वने द्वादश वत्सरान् वसध्वं कृष्णया
सार्द्धमजिनैः प्रतिवासिताः १२ त्रयोदशं च सजने अज्ञाताः परिवत्सरं ज्ञाताश्च पुनरन्यानि वने वर्षाणि द्वादश १३ त्रयोदशे च निर्वृत्ते
पुनरेव यथोचितं स्वराज्यं प्रतिपत्तव्यमितरैरथवेतरैः १४ अनेन व्यवसायेन सहास्माभिर्युधिष्ठिरः अक्षान्युप्त्वा पुनर्द्यूतमेहि दीव्य
स्व भारत १५ अथ सभ्याः सभामध्ये समुच्छितकरास्तदा ऊचुरुद्विग्नमनसः संवेगात्सर्व एव हि १६ सभ्या ऊचुः अहो धिग्बान्धवा
नैनं बोधयन्ति महद्भयं बुद्ध्यो त्वया बुध्येद्यं वै भरतर्षभ १७ वैशंपायन उवाच जनप्रवादान् सुबहून् शृण्वन्नपि नराधिपः क्रियाचध
र्मसंयोगात् पार्थो द्यूतमियात् पुनः १८ जानन्नपि महाबुद्धिः पुनर्द्यूतमवर्तयत् अप्यासन्नो विनाशः स्यात् कुरूणामिति चिंतयन् १९
युधिष्ठिर उवाच कथं वै मद्विधो राजा स्वधर्ममनुपालयन् आहूतो विनिवर्त्तेत दीव्यामि शकुने त्वया २० शकुनिरुवाच गवाश्वं बहुधे
नुकमपर्यन्तमजाविकं गजाः कोषो हिरण्यं च दासीदासाश्च सर्वशः २१ एको नो ग्लह एको वै वनवासाय पांडवाः यूयं वयं वा विजिता वसेम
उभ्या४ पा३
वनमाश्रिताः २२

त इति लज्जया धर्मसंयोगात् तीर्थाय घटनजात १८ २० गजाश्वादिकं बहुधेनुकं बहुदोग्ध्रीकं पणीकृतमिति शेषः २१ २२ ॥ छ ॥ छ ॥ छ ॥ सभा० ११४

सपत्नैकस्य पराग्लहस्य इति २३ समुत्क्षेपेण एकेनैव वचनोपक्षेपेण सकृद्द्यूतमात्रेणेत्यर्थः प्रतिजग्राह तं ग्लहं अंगीचकार ततः सौबलोपि ग्लहं जग्राह पाशान् पा
तितवान् २५ अनुद्यूतसमाप्ते ततः परा दीक्षा व्रतग्रहणं तत् संजातं येषां ते दीक्षिताः १ ३ पांडोः क्लिवे पांडवे। अद्य तदसुद्धं तान् स्त्रीभ्यो रणितेभ्यः कृतयोपरपत्नानि
पांडवेयाः समैः सर्वैः मार्गैः अस्थलैः आगंतृभिरतिसंकीर्णत्वात् स्थलहीनैः संप्रयातान् अस्मात् अतीति शेषः सर्वे यद्देवा अनुकूला इत्यर्थः गुणैः श्रीमत्त्वादिभिः ज्येष्ठाः

एवं नो ग्लहस्यैकेको वनवासाय पांडवाः वयं वा विजिता वत्स्यामो वनमाश्रिताः २३ त्रयोदशं च वै वर्षमज्ञाताः सजने तथा अनेन व्यवसायेन दी
व्याम पुरुषर्षभाः २४ समुत्क्षेपेण चैकेन वनवासाय भारत प्रतिजग्राह तं पार्थो ग्लहं जग्राह सौबलः जितमित्येव शकुनिर्युधिष्ठिरमभाषत २५
इति सभापर्वणि अनुद्यूतसमाप्ते वैशंपायन उवाच ततः पराजिताः पार्था वनवासाय दीक्षिताः अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमं
१ अजिनैः संवृतान् दृष्ट्वा हृतराज्यानरिंदमान् प्रस्थितान् वनवासाय ततो दुःशासनोऽब्रवीत् २ प्रवृत्तं धार्तराष्ट्रस्य चक्रं राज्ञो महात्मनः पराजि
ताः पांडवेया विपत्तिं परमां गताः ३ अद्य देवाः संप्रयाताः समैर्वर्त्मभिरस्थलैः गुणज्येष्ठास्तथा श्रेष्ठा भूयांसो यद्वयं परैः ४
नरकं पातिताः पार्था दीर्घकालमनंतकं सुखाच्च हीना राज्याच्च विनष्टाः शाश्वतीः समाः ५ धनेन मत्ता ये ते स्म धार्तराष्ट्रान् प्रहा
सिषुः ते निर्जिता हृतधना वनमेष्यंति पांडवाः ६ चित्रान् सन्नाहानवमुंचंतु चैषां वासांसि दिव्यानि च भानुमंति विवास्यंतां रुरुचर्माणि
सर्वे यथा ग्लहं सौबलस्याभ्युपेताः ७ न संति लोकेषु पुमांस ईदृशा इत्येव ये भावितबुद्धयः सदा ज्ञास्यंति तेत्मानमिमेद्य पांडवा विपर्यये षंढ
तिला इवाफलाः ८

तथा ज्येष्ठाः वयसा। अतएव भूयांसः प्रशस्यतराः ४ ५ प्रहासिषुः सभायां दुर्योधनं जले पतितं दृष्ट्वा हासं कृतवंतः ६ सन्नाहान् उष्णीषकवचकवचकटिबं
धादीन् भानुमंति सुवर्णतंतुमयत्वाद्दीप्तिमंति। विवास्यंतां परिधाप्यंतां रुरुः कृष्णमृगः ७ ईदृशाः अस्मत्सदृशाः। अफलाः निर्वीर्याः ८ ॥ ॥

स०
११५

इदं चेति यत्स्वेति छिद्रः यदिदं द्वैरं स्ववासः आहवेषु यज्ञेषु यान्यवसं ग्राममनामानि तानि यज्ञनामानीति यास्कः दृष्ट्वा नारीक्षितानामिव पाण्डवानां रथ्ये तेन च तद्दत्तम्
उपयन। यद्दत्तं अदीक्षितानां केवर्तादीनामजितानामिति योजना। अदीक्षायामपि दीक्षितवासा सिंहसाना: केवर्तकवररथ्यतरस्यर्थः ९ यज्ञसेनो द्रुपदः १० सूक्ष्मप्र

इदं हि वासो यदि वेदृशानां मनस्विनां कौरव मा भवेद्वः अदीक्षितानामजितानि चित्रं नावलीयसां पश्यत पाण्डवानां ९ महाप्राज्ञः सोम
किर्यज्ञसेनः कन्यां पाञ्चालीं पाण्डवेभ्यः प्रदाय अकार्षीद्धि सुकृतं नेह किंचित् क्लीबाः पार्थाः पतयो याज्ञसेन्याः १० सूक्ष्मप्रावाराजि
नोत्तरीयान् दृष्ट्वारण्ये निर्द्धनानप्रतिष्ठान् कालेऽप्रीतिं लप्स्यसे याज्ञसेनि पतिं वृणीष्वेह यमन्यमिच्छसि ११ एते हि सर्वे कुरवः समेताः
क्षान्ता दान्ताः सुद्रविणोपपन्नाः एषां वृणीष्वैकतमं पतित्वे न त्वां नयेत्कालविपर्ययोऽयं १२ यथाफलाः षण्ढतिला यथा चर्ममया मृगा
: तथैव पाण्डवाः सर्वे यथा काकयवा इति १३ किं पाण्डवांस्त्वं पतितानुपास्य मोघः श्रमः षण्ढतिलानुपास्य एवं नृ॑सः परुषाणि। शं
पार्थानश्रावयद्धृतराष्ट्रस्य पुत्रः १४ तद्वै श्रुत्वा भीमसेनोऽत्यमर्षी निर्भर्त्स्योच्चैः सन्निगृह्यैव रोषात् उवाचैनं सहसैवोपगम्य सिं
हो यथा हैमवतः शृगालं १५ भीमसेन उवाच क्रूरपापजनैर्जुष्टमकृतार्थं प्रभाषसे गांधारविद्यया हि त्वं राजमध्ये विकत्थसे १६
यथा तुदसि मर्माणि वाक्शरैरिह नो भृशं तथा स्मारयिताऽतेहं कृन्तन्मर्माणि संयुगे १७ ये च त्वामनुवर्तन्ते क्रोधलोभवशानुगाः
गोप्तारः सानुबंधांस्तान्नेतास्मि यमसादनं १८ ॥ ॥

चाराजनतुछपरीधानीयवस्त्रान् अप्रतिष्ठान्नष्टस्थानान् ११ कालविपर्ययः क्लेशकालः त्वां न नयेत् न कर्षेत् न त्वयेदिस्यपि पाठः १२ काकयवानिस्तंडुलान्
राधाम्य १३ १५ गांधारस्य शकुनेर्विद्यया न तु बाहुबलेनेति भावः १६ स्मारयिता स्मारयिष्यामि १७ सानुबंधान्सपुत्रबांधवान् १८ ॥

राम०
११५

अजिनैर्विवासितं आच्छादितं तावन्मात्रयासंपन्नासहराज्यात्बहिष्कृतं धर्मेराजानिबद्धो ÷ निरुद्धोमार्गोगौरितियुमर्दनार्थंमोचयस्वेत् मधुपर्केगौर्गौरितित्रिर्निवेदितायाः गोः वधः उत्स
र्गश्चदृष्टः तत्सामान्यात् अत्रकत्पायातिथ्येनिवेदिताः पां उवपक्रवउत्सृष्टाः तेपुनर्वयंमृत्युमुखात्समुत्क्रान्ताइतिउत्सृष्टमात्राएववेगेनपलायंतेपुनरस्मानयंमावधिष्टेतितेषांप
रिहासेनव्याकुलीकरणाय-- नराद्धानंत्रिर्यतिगौर्गौरिति मत्युभयात्पशुवत्प्राणभयात्पलायंतइतिपांडवानांकातरत्वसूचकोयमुपहासः अस्योत्तरंद्रोणपर्वणि

वैशंपायनउवाच एवंब्रुवाणमजिनैः प्रवासितंदुःशासनस्तं दुःशासनस्तंपरिनृत्यतिस्म मध्येकुरूणांधर्मनिबद्धमार्गंगौर्गौरितिस्माह्वय
मुक्तलज्जः भीमसेनउवाच नृशंसपरुषंवक्तुंशक्यंदुःशासनत्वया निकृत्याहिधनंलब्ध्वाकोविकत्थितुमर्हति २० मैवस्मसुकृतांल्लोका
न्गच्छेत्पार्थोवृकोदरः यदिवक्षोहितेभित्त्वानपिबेच्छोणितंरणे धार्तराष्ट्रान्रणेहत्वामिषतांसर्वधन्विनां शमंगंतास्मिनचिरात्सत्यमेतद्ब्र
वीमिते २१ वैशंपायनउवाच तस्यराजासिंहगतेः सखेलंदुर्योधनोभीमसेनस्यहर्षात् गतिंस्वगत्यानुचकारमंदोनिर्गच्छतांपांडवानां
सभायाः २३ नैतावताकृतमित्यब्रवीत्तंवृकोदरः परिवृत्तार्धकायः शीघ्रंहित्वानिहतंसानुबंधंसंस्मार्याहंप्रतिवक्ष्यामिमूढ २४

गौरिति
भीमसेनोवक्ष्यति यस्मान्पूर्वंषंढनरसंततिमुद्दिश्यगौरितिगौरिति तावद्वयंप्रतिनृत्यामः पुनर्गौरिति उत्सृष्टान्पशूनिवाभीषयितुमाह्वयंतोयस्मात्पूर्वंषंढनरसंतितानेवयुद्धेवि
दारितान्दृष्ट्वान्तसामइतिनरेर्थः ९ ११ मिषतांपश्यतां १२ २३ प्रतिवक्ष्यामिअस्यपरिहासस्योत्तरमितिशेषः २४ २५

स०
११६

आत्मनिचित्ते १५ १८ परुषस्यकर्कशस्य १९ व्यवसितंकीर्तितं (चि) द्रष्टारः द्रक्ष्यामः २० २१ प्रष्टारउक्तेनजनकंप्रवक्तारंकुबुद्धेः २२ ॥ ॥

एतत्समीक्ष्यात्मनिचावमानंनियम्यमन्युंबलवान्समानी राजानुगःसंसदिकौरवाणांविनिःक्रमन्वाक्यमुवाचभीमः २५ भीम
उवाच अहंदुर्योधनंहन्ताकर्णंहन्ताधनंजयः शकुनिंचाक्षकितवंसहदेवोहनिष्यति २६ इदंचभूयोवक्ष्यामिसभामध्येबृहद्वचः
सत्यंदेवाःकरिष्यंतियन्नोयुद्धंभविष्यति २७ सुयोधनमिमंपापंहंतास्मिगदयायुधि शिरःपादेननचास्याहमधिष्ठास्यामिभूत
ले २८ वाक्यशूरस्यचैवास्यपरुषस्यदुरात्मनः दुःशासनस्यरुधिरंपातास्मिमृगराडिव २९ अर्जुनउवाच नैववाचाव्यवसितं
भीमविज्ञायतेसतां इतश्चतुर्दशेवर्षेद्रष्टारोयद्भविष्यति ३० भीमसेनउवाच दुर्योधनस्यकर्णस्यशकुनेश्चदुरात्मनः दुःशासनचतुर्था
नांभूमिःपास्यतिशोणितं ३१ अर्जुनउवाच असूयितारंद्रष्टारंप्रवक्तारंविकत्थनं भीमसेननियोगात्तेहंताहंकर्णमाहवे ३२ अ
र्जुनःप्रतिजानीतेभीमस्यप्रियकाम्यया कर्णंकर्णानुगांश्चैवरणेहंतास्मिपत्रिभिः ३३ येचान्येप्रतियोत्स्यंतिबुद्धिमोहेनमांनृपाः
तांश्चसर्वानहंबाणैर्नेतास्मियमसादनं ३४ चलेद्धिहिमवान्स्थानान्निःप्रभःस्याद्दिवाकरः शैत्यंसोमात्प्रणश्येतमत्सत्यंविचलेद्यदि
३५ नप्रदास्यतिचेद्राज्यमितोवर्षेचतुर्दशे दुर्योधनोभिसत्कृत्यसत्यमेतद्भविष्यति ३६ वैशंपायनउवाच इत्युक्तवतिपार्थेतु
श्रीमान्माद्रवतीसुतः प्रगृह्यविपुलंबाहुंसहदेवःप्रतापवान् ३७ सौबलस्यवधंप्रेप्सुरिदंवचनमब्रवीत् क्रोधसंरक्तनयनोनि
श्वसन्निवपन्नगः ३८ सहदेवउवाच अक्षान्यान्मन्यसेमूढगांधाराणांयशोहर नैतेक्षानिशितबाणास्त्वयैतेसमरेधृताः
३९ यथाचैवोक्तवान्भीमस्त्वामुद्दिश्यसबांधवं कर्ताहंकर्मणस्तस्यकुरुकार्याणिसर्वशः ४० ॥ ॥

राम०
११६

अध्यायः एवं १ २ दृष्टास्मिद्रक्ष्यामि ३ आमन्त्राः नष्टाः ४ ५ अगदंश्चारोग्यं ६ ८ ममममतमितितिरोमः ९ १० १६

हंतास्मितरसायुद्धेत्वामेवहसंबाधवं यदिस्थास्यसिसंग्रामेक्षत्रधर्मेणसौबल ४१ सहदेववचः श्रुत्वानकुलोपिविशांपते द्रौपदीनीयतनमोन्द्रगा
मिदंवचनमब्रवीत् २ सुतेपंचयज्ञसेनस्यघातेस्मिन्धृतराष्ट्रजैः येवाचः श्राविताकृष्णाः स्थितेदुर्योधनप्रियैः ३ तान्धार्त्तराष्ट्रान्दुर्वृत्तान्
मुमूर्षून्कालचोदितान् गमयिष्यामिभूयिष्ठानहंवैवस्वतक्षयं ४ निदेशाद्धर्मराजस्यद्रौपद्याः पदवीचरन् निर्द्धार्त्तराष्ट्रांपृथिवीकर्त्तास्मि
नचिरादिव ५ वैशंपायनउवाच एवंतेपुरुषव्याघ्राः सर्वेव्यायतबाहवः प्रतिज्ञाःकृत्वाधृतराष्ट्रमुपागमन् ६ इतिसभापर्वणिवन
७५ प्रवेशे युधिष्ठिरउवाच आमंत्रयामिभरतांस्तथावृद्धंपितामहं राजानंसोमदत्तंचमहाराजंचबाह्लिकं १ द्रोणंकृपंनृपांश्चा
न्यानश्वत्थामानमेवच विदुरंधृतराष्ट्रंचधार्त्तराष्ट्रांश्चसर्वशः २ युयुत्सुंसंजयंचैवतथैवान्यान्सभासदः सर्वानामंत्र्यगच्छामिद्रष्टास्मिपुनरेस
वः ३ वैशंपायनउवाच नतेकिंचिद्वचोब्रुवंस्तत्रह्रियासन्नायुधिष्ठिरं मनोभिरेवकल्याणंदध्युस्तेतस्यधीमतः ४ विदुरउवाच आर्याप्टथा
राजपुत्रीनारण्यंगंतुमर्हति सुकुमारीचवृद्धाचनित्यंचैवसुखोचिता ५ इहवत्स्यतिकल्याणीसत्कृताममवेश्मनि इतिपार्थाविजानी
ध्वमगदंवोस्तुसर्वशः ६ पांडवाऊचुः तथेत्युक्त्वाब्रुवन्सर्वेयथानोवदसेनघ त्वंपितृव्यः पितृसमोवयंचत्वत्परायणाः ७ यथाज्ञा
पयसिविद्वंस्त्वंहिनः परमोगुरुः यच्चान्यदपिकर्त्तव्यंतद्विधत्स्वमहामते ८ विदुरउवाच युधिष्ठिरविजानीहिममेदंभरतर्षभ नाधर्मेणजि
तः कश्चिद्व्यथतेवैपराजये ९ त्वंवैधर्मविजानीषेयुद्धेजेताधनंजयः हंताऽरीणांभीमसेनोनकुलस्त्वर्थसंग्रहे १० ॥

॥ ॥ ॥ ॥ ॥ ॥

स०
११७

समाधिः मनःस्वास्थ्यकरः १३ १६ माहासीः मात्यज सांपरायेपरलोकविषयेविधारणेनियमेन १८ विसर्गेदाने संयमेवशीकरणे आत्मप्रदानंसर्वहितार्थंशरीरादेर्माघारं

संयन्तासहदेवस्तुधौम्योयंब्रह्मविदुत्तमः धर्मार्थकुशलाचैवद्रौपदीधर्मचारिणी ११ अन्योन्यस्यप्रियाःसर्वेतथैवप्रियदर्शनाः परैरभेद्याःसंतुष्टा
कोवोनस्पृहयेदिह १२ एषवैसर्वकल्याणःसमाधिस्तवभारत नैनंशत्रुर्विषहतेशक्रेणापिसमोप्युत १३ हिमवत्यनुशिष्टोसिमेरुसावर्णि
नापुरा द्वैपायनेनकृष्णेननगरेवारणावते १४ भृगुतुंगेचरामेणदृषद्वत्यांचशंभुना अश्रौषीरसितस्यापिमहर्षेरंजनंप्रति १५ कल्माषीती
रसंस्थस्यगतस्त्वंशिष्यतांभृगोः द्रष्टासदानारदस्तेधौम्यस्तेयंपुरोहितः १६ माहासीःसांपरायेत्वंबुद्धिंतामृषिपूजितां पुरूरवसमैलंत्वंबु
द्ध्याजयसिपांडव १७ शक्त्याजयसिराज्ञोन्यानृषीन्धर्मोपसेवया ऐंद्रेविजयसेशौर्याद्यमंकोपविधारणात् १८ त्यागेनधनदंदेवंवरुणंसं
यमेनच आत्मप्रदानेसौम्यत्वमद्भ्यश्चैवोपजीवनं १९ भूमेःक्षमाचतेजश्चसमग्रंसूर्यमंडलात् वायोर्बलंविद्धिसत्वं भूतेभ्यश्चात्मसं
भवं २० अगदंवोस्तुभद्रंवोद्रक्ष्यामिपुनरागतान् आपद्धर्मार्थकृच्छ्रेषुसर्वकार्येषुवापुनः २१ यथावत्प्रतिपद्येथाःकालेकाले
युधिष्ठिर आपृष्टोसीहकौंतेयस्वस्तिप्राप्नुहिभारत २२ कृतार्थंस्वस्तिमंतंत्वांद्रक्ष्यामःपुनरागतं नहिवोवृजिनंकिंचिद्वेदकश्चित्पु
राकृतं २३ वैशंपायनउवाच एवमुक्तस्तथेत्युक्त्वापांडवःसत्यविक्रमः भीष्मद्रोणौनमस्कृत्वाप्रातिष्ठतयुधिष्ठिरः २४ इति
सभापर्वणि ७६ ॥ ॥

राम०
११७

णं उपजीवनंजीवनहेतुत्वं ऐंद्रेइतिलोकपालगुणान्पंचमहत्गुणांश्चसर्वसंपत्तिहेतून्त्वंजयादीन्प्राप्नुहीत्यर्थः १९ अध्यायः ॥ ॥ ॥ ॥

भवेति १

ततः सं १५ अरिष्टं निर्विघ्नं मदनुध्यानं बृंहिता स्त्रीगुणेन पातिव्रत्येन युक्तापि मातृगुणेन वात्सल्येनापि वर्द्धिता भर्तृशुश्रूषा भक्तिः सा लेहं वेत्ती भावः ६. ८ शोणिताक्तैक

वैशंपायन उवाच तस्मिन्संप्रस्थिते कृष्णा पृथां प्राप्य यशस्विनी आपृच्छद्भृशदुःखार्त्ता याश्चान्यास्तत्र योषितः १ यथार्हं वंदनाश्लेषान्कृ
त्वा गंतुमियेष सा ततो निनादः सुमहान्पांडवानां पुरेऽभवत् २ कुंती च भृशसंतप्ता द्रौपदीं प्रेक्ष्य गच्छतीं शोकविह्वलया वाचा कृच्छ्रा
द्वचनमब्रवीत् ३ वत्से शोको न ते कार्यः प्राप्येदं व्यसनं महत् स्त्रीधर्माणामभिज्ञासि शीलाचारवती तथा ४ न त्वां संदेष्टुमर्हामि भ
र्तॄन्प्रति शुचिस्मिते साध्वीगुणसमापन्ना भूषितं ते कुलद्वयं ५ सभाग्याः कुरवश्चेमे ये न दग्धास्त्वयानघे अरिष्टं व्रज पंथानं मदनुध्या
नबृंहिता ६ भाविन्यर्थे हि सत्स्त्रीणां वैक्लव्यं नोपजायते गुरुधर्माभिगुप्ता च श्रेयः क्षिप्रमवाप्स्यसि ७ सहदेवश्च मे पुत्रः सदावेक्ष्यो
वने वसन् यथेदं व्यसनं प्राप्य नायं सीदेन्महामतिः तथेत्युक्त्वा तु सा देवी स्रवन्नेत्रजलाविला शोणिताक्तैकवसना मुक्तकेशी वि
निर्ययौ ९ तां क्रोशंतीं पृथा दुःखादनुवव्राज गच्छतीं अथापश्यत्सुतान्सर्वान्हृताभरणवाससः १० रुरुचर्मावृततनून्ह्रि
या किंचिदवाङ्मुखान् परैः परीतान्संहृष्टैः सुहृद्भिश्चानुशोचितान् तदवस्थान्सुतान्सर्वानुपसृत्यातिवत्सला सस्वजानावदच्छोका
त्तत्तद्विलपती बहु १२ कुंत्युवाच कथं सद्धर्मचारित्रान्वृत्तस्थितिविभूषितान् अक्षुद्रान्दृढभक्तांश्च दैवतेज्यापरान्सदा १४
व्यसनं वः समभ्यागात्कोऽयं विधिविपर्ययः कस्यापध्यानजं चेदमागः पश्यामि वो धिया १५ ॥ ॥ ॥

वसनारजस्वला ६ १० सस्वजमानाआलिंगमाना १२ १२ १३ १४ अपध्यानजं क्रोधजं १५ १५ १५ १५

अहिविनाकृताः संपद्विहीनाः व्रहीतिपादेपिसंबध्यते १६ १७ शातस्ट्टगात् १८ पुत्राधिंपुत्रविषयामनःपीडा १९ २० अभिसंधिताकृता मदुर्भम २१ मोपुत्र
काः वः युष्मानन्विहासि २२ अमुंदुर्मेधाराणधारेणानवनितिविनाशवतिप्रमादतः पंडोरिवममात्तः किंन्नविदितः २३ २४ अनादिनिधनमितिद्वारकावा

स्यातुमन्दाप्यदोषायंयाहंयुष्मानजीवनं दुःखाध्यासमुजोत्सर्थपुत्रान्पुत्रैमेगुणैः १६ कथंवत्सयदुर्गेषुवनेष्वहिविनाकृताः वीर्यस
त्ववलोत्साहतेजोभिरकृशाः कृशाः १७ यद्येतदेवमन्तासंवनेवासोहिवोध्रुवं शतशृंगात्मृतेपांडौनागमिष्यंगजाह्वये १८ धर्मवः
पितरंमन्येतपोमेधान्वितंतथा यः पुत्राधिममंसंप्राप्यस्वर्गेछामकरोत्प्रियां १९ धर्मोवातींद्रियज्ञानामिमांप्राप्तांपरांगतिं मन्येतुमादीधं
र्मज्ञाकल्याणीसर्वथैवतु २० रत्यामत्साचगत्याचययाहमभिसंधिता जीवितप्रियतामह्यंधिग्मांसंक्लेशभागिनीं २१ पुत्रकास्त्वजहा
म्यघकृछ्रलब्धान्प्रियान्सतः मा साहंयास्यामिहिवनंहाकृष्णेकिंजहासिमां २२ अंतवत्सुमनुष्येषुधात्राकिंतुप्रमादतः ममांतो
नैवविहितस्तेनायुर्नजहातिमां २३ हाकृष्णद्वारकावासिनक्वासिसंकर्षणानुज कस्मान्नत्रायसेदुःखान्मांचैतांश्चनरोत्तमान् २४
अनादिनिधनंयेत्वामनुध्यायंतिवैनराः तांस्त्वपासीत्ययंवादः सगतोव्यर्थतांकथं २५ इमेसद्धर्ममाहात्म्ययशोवीर्यानुव
र्तिनः नार्हंतिव्यसनंभोक्तुंनन्वेषांक्रियतांदया २६ सेयंनीत्यर्थवित्सुभीष्मद्रोणकृपादिषु स्थितेषुकुलनाथेषुकथमापदु
पागता हापांडोहामहाराजक्वासिकिंसमुपेक्षसे २९

सिनित्यधिमतिउत्पन्ननाशयोनिराकरणं अनुपाधौकारणोपाधौवानयोरप्रसक्तेः अतएवउत्पन्नोचतुर्भुजंरूपमेववसुदेवेनदृष्टं यत्तुशरीरंवासुदेवस्यरामस्यच
महात्मनः अर्जुनोदाहयामासपुरुषैराप्तकारिभिरितिशरीरदाहवचनंतदनुसन्निवचनविरोधान्निरोभावमात्राभिप्रायं २५ २५ २५